स.जी.द्वि. ॥श्रीसहजानंदस्वामिने नमः॥ अथ द्वितीयप्रकरणं प्रारभ्यते॥ सूत उवाच॥ स्नातः कृताह्निकः सोऽथ चतु अ०१॥
॥२॥ र्दशदिने सनाम्॥ कारयामास समहं तीन्मषीदस्तत्र च स्वयम्॥ १॥ तस्मात्पुनर्निषेदुश्च नैष्ठिका ब्रह्मचारिणः
॥मुकुंदानंदप्रमुखाः स्वामिनः सहयायिनः॥ २॥ ततः संतो निषेदुश्च मुक्तानंदादयो द्विजाः॥ विप्राश्च
मयरामाद्याः क्षत्रियाः सूरजिन्मुखाः॥ ३॥ पर्वताद्या विशः शूद्रा निषेदुः काजजिन्मुखाः॥ तत्र पुंसोः स्त्र
शांतस्य जाडेनीप्रमुखाः स्त्रियः॥ ४॥ उद्धवस्याश्रिता येऽन्ये निषेदुस्तत्र ते द्विजाः॥ मुकुंदानंदाद्याः प्रांजल
यो नत्वा प्रोचुरिदं हरिम्॥ ५॥ नमः श्रीसहजानंदस्वामिने गुरुमूर्तये॥ नारायणमुने तुभ्यं नानासद्गु
णशालिने॥ ६॥ महाराज त्वमेवासि स्थाने श्रीस्वामिनो ध्रुवे॥ अतः स्वामी त्वमस्माकं वयं शिष्यास्तवा
द्विजाः॥ ७॥ वर्तिष्यामहे आज्ञायां तवैव वयमादरात्॥ अतः शाधि यथार्हं नः कार्याकार्यं द्विजाधिवि
त्॥ ८॥ सूत उवाच॥ निशम्य वचस्तेषां भक्तानां स्वामी माहात्म्यमानदः॥ तेषां धर्मस्थितिं वाक्यैर्दत्तवान्ध
र्मशास्त्रगैः॥ ९॥ श्रीनारायणमुनिरुवाच॥ मुकुंदप्रमुखाः सद्धर्मैकाः शृणुत चेतरे॥ यूयं मदाश्रया ये
तिज्ञानाय च न संशयः॥ १०॥ नृदेहं प्राप्य यत्किंचित्कर्तव्यं सर्वथा जनैः॥ तदेव क्रियते नूनं भवद्भिरिह मु
मुक्षुभिः॥ ११॥ अधिकारानुसारेण पूर्वं श्रीस्वामिना यथा॥ ये ये यत्र नियुक्ताः स्युः स्यात यत्नं तत्र तैस्तथा ॥२॥

१२॥ तदुक्तान्येव सद्धर्मवाक्यानि नियतव्रतैः॥ सर्वैश्च पालनीयानि गृहस्थैस्त्यागिभिस्तथा॥ १३॥ ध
र्मादपेतं यत्कर्म यद्यपि स्यान्महाफलम्॥ न तत्सेवेत मेधावी शुचिः कुशलजित्तथा॥ १४॥ यमार्थाः क्रि
यमाणं हि स्तुवंत्यागमवेदिनः॥ स धर्मो यं च निंदंति तमधर्मं प्रचक्षते॥ १५॥ विद्या वित्तं वपुः शौर्यं
कुले जन्माविरोगिता॥ संसारसंकटोद्धारो धर्मादेव प्रवर्तते॥ १६॥ शब्दे स्पर्शे च रूपे च रसे गंधे च देहिना
म्॥ प्रभुत्वं जायते यत्तद्धर्मस्यैव फलं विदुः॥ १७॥ धर्मं चिंतयमानोऽपि यदि प्राणैर्विमुच्यते॥ तर्हि स्वर्ग
मवाप्नोति किं पुनस्तमिहाचरन्॥ १८॥ येऽपाधर्मेण ते सत्या येऽधर्मेणाधिगम्यस्तु तान्॥ धर्मो वै ग्रा
ह्यो लोके न हेयो धनकांक्षया॥ १९॥ उत्तमा उत्तमं यांति स्वर्गात्स्वर्गं सुखात्सुखम्॥ श्रद्दधानाश्च शांता
श्च धनाढ्या धर्मकारिणः॥ २०॥ धर्मः प्रज्ञां वर्द्धयति क्रियमाणः पुनः पुनः॥ धर्मादर्थश्च कामश्च सुखं
ज्ञानं च जायते॥ २१॥ अर्थकामौ जिघ्रमाणो धर्ममेवादितश्चरेत्॥ न हि धर्माद्भवेत्किंचिद्दुष्प्राप
मिति मे मतिः॥ २२॥ निपानमिव मंडूकाः सरः पूर्णमिवांडजाः॥ शुभकर्माणमायांति विवशाः सर्वसं
पदः॥ २३॥ धर्माद्राज्यं धनं सौख्यमधिप्राप्य ते सर्वसिद्धयः॥ लोकद्वयेऽपि यच्छ्रेयस्तद्धर्मात्प्राप्यते नृभिः॥ २४॥
धर्मे वृद्धे विवर्द्धंते सर्वभूतानि सर्वदा॥ तस्मिन्ह्रसति हीयंते तस्माद्धर्मो निषेव्यताम्॥ २५॥ श्रुतिस्मृत्यु

दितं धर्ममनुतिष्ठन् हि मानवः ॥ इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥ २६ ॥ एक एव सुहृद्धर्मो निध
नेप्यनुयाति यः ॥ शरीरेण समं नाशं सर्वमन्यद्धि गच्छति ॥ २७ ॥ धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः
॥ कर्मणा मनसा वाचा ततो धर्मं चरेत्सुमान् ॥ २८ ॥ न कामान्न च संरंभान्नो द्वेषान्न भयादपि ॥ न हेतोर्जी
वितस्यापि धर्मस्त्याज्यो न लोभतः ॥ २९ ॥ सीदन्नपि हि धर्मेण नाधर्मे योजयेन्मनः ॥ अधार्मिकाणां पा
पानामाशु पश्यन् विपर्ययम् ॥ ३० ॥ तृणपत्राग्रगाम्बुबिंदुवच्चंचलं नृणाम् ॥ जीवितं वर्त्तते तस्मादा
धनीयः स सत्वरम् ॥ ३१ ॥ अजरामरवत्प्राज्ञो विद्यामर्थं च साधयेत् ॥ गृहीत इव केशेषु मृत्युना धर्म
माचरेत् ॥ ३२ ॥ एकस्मिन्नप्यतिक्रान्ते दिवसे धर्मवर्जिते ॥ यो जीवति स भस्त्रेव श्वसितीति विदुर्बुधाः ॥ ३३
॥ नावसीदति चेद्धर्मः कृपालेनापि जीवता ॥ आदरोस्मिंस्तदा कार्यो धर्मवित्ता हि साधवः ॥ ३४ ॥ अर्थसि
द्धिं परामिच्छन्नपि धर्मपरो भवेत् ॥ न हि धर्मादपैत्यर्थः स्वर्गलोकादिवामृतम् ॥ ३५ ॥ तस्माद्धर्मसहायार्
थं नित्यं संचिनुयाच्छनैः ॥ धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥ ३६ ॥ स षड्विधो वर्णधर्मो धर्म आश्र
मिणां तथा ॥ धर्मो वर्णाश्रमाणां च गौणो नैमित्तिकस्तथा ॥ ३७ ॥ साधारण इति प्रोक्तः षोढा तद्वेदवेदिभिः
॥ तत्र साधारणो धर्मो यस्तं वक्त्वा ब्रवीमि वः ॥ ३८ ॥ क्षमा दया ऽनसूया च शौचानायासमंगलम् ॥ अका



र्पण्यं निःस्पृहत्वं धर्मः साधारणो मतः ॥ ३९ ॥ बाह्ये वाध्यात्मिके दुःखे केनाप्युत्पादिते सति ॥ न कुप्यति न
वा हन्ति सा क्षमा परिकीर्तिता ॥ ४० ॥ परे वा बंधुवर्गे वा मित्रे द्वेष्टरि वा सदा ॥ आपन्नः सर्वथा रक्ष्यो
दयैषा परिकीर्तिता ॥ ४१ ॥ न गुणान्गुणिनां हन्ति स्तौति मंदगुणानपि ॥ नान्यदोषेषु रमते सानसूया प्र
कीर्तिता ॥ ४२ ॥ अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिंदितैः ॥ स्वधर्मे च व्यवस्थानं शौचमेतत्प्रकीर्तितम्
४३ ॥ शरीरं पीड्यते येन सुशुभेनापि कर्मणा ॥ अत्यंतं तन्न कर्तव्यमनायासः स उच्यते ॥ ४४ ॥ अशेहःशालि
मात्रस्य वर्जनं चान्नतस्य च ॥ प्रशस्ताचरणं नित्यं यत्तन्मंगलमुच्यते ॥ ४५ ॥ लोकादपि प्रदातव्यमदीनेनां
तरात्मना ॥ अहन्यहनि यत्किंचिदकार्पण्यमितस्मृतम् ॥ ४६ ॥ यथालब्धेन संतोषः परद्रव्याद्यचिंतनम्
अनासक्तिश्च देहादौ निःस्पृहत्वं तदुच्यते ॥ ४७ ॥ धर्मस्य धर्तुर्जगतां हि भक्ताः संक्षेपतो लक्षणमेतदुक्त
म् मया यथावत्कथयाम्यथो वेत्स्याम्युपायं च मुमुक्षुवेद्यम् ॥ ४८ ॥ इति श्रीसत्संगिजीवने नारायणचरि
त्रे धर्मशास्त्रे द्वितीयप्रकरणे नारायणमुनिमुकुंदानंदादिसंवादे धर्मप्रशंसानिरूपणनामा प्रथमोऽध्याय
ः ॥ १ ॥ श्रीनारायणमुनिरुवाच ॥ कायक्लेशैर्न बहुभिर्न चैवार्थस्य राशिभिः ॥ धर्मः संप्राप्यते सूक्ष्मः श्रद्धा
हीनैः सुरैरपि ॥ १ ॥ सर्वस्वं जीवितं वापि दद्याद्यश्श्रद्धया यदि ॥ नाप्नुयात्स फलं किंचिच्छ्रद्धावानस्ततो भवेत्

॥ स-जी-ठि- ॥ २ ॥ श्रुतिमात्ररसाः सूक्ष्माः प्रधानपुरुषेश्वराः ॥ श्रद्धामात्रेण गृह्यंते न करेण न चक्षुषा ॥ ३ ॥ श्रद्धा मातेव स श्र० २ ॥
॥ ३ ॥ र्वेषां ज्ञानवैराग्ययोः प्रसूः ॥ श्रद्धया साध्यते धर्मो नान्योपायेन केनचित् ॥ ४ ॥ अपि निष्किंचना विप्राः श्रद्ध
वंतो दिवं गताः ॥ धर्मार्थकाममोक्षाणां श्रद्धा परमसाधनम् ॥ ५ ॥ क्रियावान् श्रद्दधानश्च दाता प्राज्ञोऽन
सूयकः ॥ धर्माधर्मविवेकज्ञस्तमस्तरति दुस्तरम् ॥ ६ ॥ श्रद्धयाऽऽचर्यमाणोऽपि धर्मः शिथिलचेतसाम् ॥ प
पावरूकजरी न स्मात्कर्त्तव्यो नियमस्ततः ॥ ७ ॥ असिधाराव्रतं तीव्रं तत्पुंसां नियमशीलनम् ॥ दुष्करेण नियमः
पुंभी रागलोभाकुलात्मभिः ॥ ८ ॥ देवत्वं देवताः प्राप्ताः प्रकाशंते च तारकाः ॥ नियमाचरणादेव वेलां नाक्र
मतेऽर्णवः ॥ ९ ॥ नियमाद्दीप्यते वह्निर्नियमात्तप्यते रविः ॥ नियमाद्वाति पवनो नियमाद्ध्रियते जगत् ॥ १०
नियमानां हि त्रस्यंते समृद्धाः फलसिद्धयः ॥ तथा विनियमानां च घोरा आपत्तयो भुवि ॥ ११ ॥ श्रद्दधानैस्ततः
पुंभिर्धर्मो नियमपूर्वकम् ॥ वर्द्धनीयः प्रतिदिनं परलोकसहायकृत् ॥ १२ ॥ देशः काल उपायश्च द्रव्यं श्रद्धा त
थैव च ॥ पात्रं त्याग इति प्रोक्तं धर्मसूलं हि सप्तकम् ॥ १३ ॥ शुद्धैरेतैर्न चेद्धर्मो विशुद्धः फलदायकः ॥ अशुद्धैर्विप
रीतः स्यादिति ज्ञेयं विचक्षणैः ॥ १४ ॥ पुंसां गुणाश्च दोषाश्च सदसत्संगतोऽपि हि ॥ अतस्तत्संगः सतां कार्यो ना
सतां तु मुमुक्षुभिः ॥ १५ ॥ शिवजातस्य वै योनिरसतां तु समागमः ॥ अहन्यहनि धर्मादि र्योनिः साधुसमाग ॥ ३ ॥

मः ॥ १६ ॥ येषां त्रीण्येव दातानि विद्या योनिश्च कर्म च ॥ संतस्तान्नेव सेवेत परीक्ष्य मतिमान्नरः ॥ १७ ॥ निरारं
भात्त्यपि नराः पुण्यशीलोपसेवनात् ॥ पुण्यमेवाप्नुवंतीह पापं पापोपसेवनात् ॥ १८ ॥ असतां दर्शनात्स्पर्शा
त्संजल्पाच्च सहासनात् ॥ धर्माचाराः प्रहीयंते न च सिध्यंति मानवाः ॥ १९ ॥ बुद्धिश्च हीयते पुंसां नीचैः सह स
मागमात् ॥ मध्यमैर्मध्यतां याति श्रेष्ठतां याति चोत्तमैः ॥ २० ॥ तस्मात्प्राज्ञैश्च वृद्धैश्च सुलभावैस्तपस्विभिः
सद्भिश्च सह संसर्गः कार्यः शमपरायणैः ॥ २१ ॥ कर्त्तव्यस्य हि धर्मस्य यथावल्लक्षणं ततः ॥ अधर्मस्यापि
कार्यस्य ज्ञायते सम्यगेव हि ॥ २२ ॥ पूर्वं सर्वे ततो नत्काः सतामेव समागमम् ॥ कुर्वंत एवाचरेत स्वस्वधर्मं
यथोचितम् ॥ २३ ॥ श्रीवासुदेवमाहात्म्यास्तु ज्ञेयस्तिस्वयम् ॥ स्वाम्येवी चेततस्तस्माद्देष्वैस्तन्वतश्च सः
॥ २४ ॥ तमाश्रितान्भगवतो राधारूपस्य सन्निसदा ॥ एकांतभक्तिं कुरुत स्वामीष्टफलदायिनीम् ॥ २५ ॥ धर्माध
र्मौ साध्वसाधू न्यायान्यायौ च तत्त्वतः ॥ कृष्णस्य रूपतत्त्वं च बुध्यंते ज्ञानतः सतः ॥ २६ ॥ अवश्यमेव तत्कार्यः स
च्छास्त्राभ्यास आदरात् ॥ स्वस्वबुद्ध्यनुसारेण भवद्भिर्मद्रुपाश्रयैः ॥ २७ ॥ नैर्गुण्यस्थितिमाप्यापि न सच्छास्त्रा
णि संत्यजेत् ॥ सर्वेन्द्रियवर्जनान्नास्ति हान्यपि ज्ञानं प्रजंतिपतत् ॥ २८ ॥ ब्रह्मा हराद्याः किं नगाश्च कृष्णस्य भक्तौ ततो भवेत्
बुद्धिमोहश्च शौचिल्यं श्रवणाच्चापि जायते ॥ २९ ॥ स्थापिते ये पुरुषस्य साकारत्वविशुद्धते ॥ सच्छास्त्राणि

॥स॰जी॰द्वि॰
॥ ४ ॥

तुलान्येव वेदार्थानुसृतानि हि ॥ २० ॥ बहूनि संति तानीह तेषु मुख्यानि यानि मे ॥ भवंति तानि कथये शृणुत ॥ अ॰ २ ॥
तान्यहितानि वः ॥ २१ ॥ वेदाश्च व्याससूत्राणि गीता भगवतोदिता ॥ नाम्नां सहस्रं विष्णोश्च श्रीमद्भागवतं
तथा ॥ २२ ॥ श्रीवासुदेवमाहात्म्यं नीतिर्विदुरकीर्तिता ॥ याज्ञवल्क्यस्मृतिश्चेति संत्यभीष्टानि मे त्विमे ॥ २३ ॥
तत्रापि निगमप्रोक्तास्तथा शारीरकाणि च ॥ इति रामानुजाचार्यभाष्योपेतं मतं द्वयम् ॥ २४ ॥ एतद्व्याससतो
बुद्धिः सूक्ष्मवक्त्वेव वासिता ॥ भवेत्ततो मञ्ज्ञात्वा दीर्नपते दोद्भवाध्वतः ॥ २५ ॥ अशक्तो हि विमोक्षपाव्ये
तुंपः स सर्वथा ॥ गीतां रामानुजाचार्यभाष्योपेतां पठेन्नरः ॥ २६ ॥ स्मृतिस्तु याज्ञवल्क्यस्य विज्ञानेश्वरकृत
या ॥ युक्ता मिताक्षरानाम्न्या टीकयैव मता मया ॥ २७ ॥ आचारव्यवहाराणां प्रायश्चित्तस्य चापि नाम् ॥ एतया
निर्णयः कार्यः संप्रदायानुसारतः ॥ २८ ॥ ग्रंथेष्वेषु परतीष्टमेव यो भागवतस्य यो ॥ दशमः पंचमः स्कंधो याः
ज्ञवल्क्यस्य च स्मृतिः ॥ २९ ॥ कर्तव्यानि स्वपाठादावेतेष्ठ्येव मास्ततः ॥ विचार्याः स्वस्थमनसा मदीयैः श्रे
यसे जनैः ॥ ४० ॥ इत्याज्ञा पालनीया मे भवद्भिर्मामुपाश्रितैः ॥ शोकस्तु तामिनो नैव कार्यः प्रकृतजीववत्
४१ ॥ अव्यक्तस्वरूपस्य मम तो येतु पूरुषाः ॥ कल्याणार्थं द्विजगतां तेयं तत्तन्नमस्तुतजे ॥ ४२ ॥ आविर्भावति
रोभावौ तेषां स्यातं अतः किल ॥ भवतो नश्चित रव ज्ञित कर्मव ज्ञात्वा चित ॥ ४३ ॥ तदेहत्याग मा जो का सुर्तुं स ॥ ४ ॥

पुत्रतोऽस्तु गः ॥ देवास्तु तत्स्वरूपतात्तेषां जीर्णा विदंतिताम् ॥ ४४ ॥ अतः शोकं विहायैव सेव्यमूर्तिर्गुरोः प्र
भोः ॥ ध्यानस्वरेशान् प्रयाता रायाम्यहं धीरजित्सुरम् ॥ ४५ ॥ **सुव्रत उवाच** ॥ एवं सुबोधितास्तेन विप्रा लोकाः
वतिक्षिताः ॥ स्वस्वरेशं पपुनेतां भक्ता सत्वगुरुं विदुः ॥ ४६ ॥ सकलनिगमधर्मशास्त्रसारं समुपदिशन्
विप्रांई मुनिश्रिलस ॥ हरिरखिलसतीर्थशोकमीशः क्षितिपहरन्नभिधां चकार सार्थाम् ॥ ४७ ॥
इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे नारायणमुनिमुकुंदादिसंवादे श्रुत्यादिसच्छास्त्रास
मतं शास्त्रोपदेश निरूपणनामा द्वितीयोऽध्यायः ॥ २ ॥ सुव्रत उवाच ॥ ततः शिष्यैरनुगतः कतिभिश्च स भूपते ॥ ध
र्मत्रवत्स्यैकमना धीरजित्सुरमभ्यगात् ॥ १ ॥ भक्तैः स बहुभिर्मार्गे पूज्यमानोऽतिभावतः ॥ भांडीरपुरमागत्य
मणिभद्रपुरे ययौ ॥ २ ॥ ग्रामं पिप्पलसंज्ञं च ततोऽगत्तरयाभिधम् ॥ कालवाणीं ततः प्रायाद्भक्ता मानं दय
न्विनान् ॥ ३ ॥ कश्चिदेकं दिनं देवा कश्चित्त्रीणि वसन्स च ॥ बोधयित्वा निजान्भक्तान्स्वस्वधर्मे व्यतिष्ठिपत्
४ ॥ आज्ञया स्वगुरोरेव पानमारोहति स्म सः ॥ रथौ कश्चिदलंकारान्नूतनानंशुकानि च ॥ ५ ॥ धर्माध्वनि स्था
पयितुं योषितो भाष्यते स्म च ॥ तथापि विज्ञापिना सक्तः सर्वभूतात्मशंकितः ॥ ६ ॥ स्थापनायै वधर्मस्य विचर
न्स धरापते ॥ प्रायात्समुद्रतीरस्थं मकराजयपत्तनम् ॥ ७ ॥ उपकंठे तत्रास्ति धोनोतिदूरे पुरादहि ॥ वटविंशा

॥स॰जी॰द्वि॰॥ दुर्लभं येस्थाने स्वावासमाचरन् ॥८॥ मुमुक्षवः पुरे तत्र तद्दर्शनमहोत्सुकाः ॥ धनिनो वणिजस्तस्य भक्ताः सेवा अ॰३॥
॥५॥ मकुर्वत ॥९॥ गोवर्धनस्तिपुमुख्यस्तथा दामोदराह्वयः ॥ रामचंद्रः सूरचंद्रौ वणिजो रत्नजिन्मुखाः ॥१०
॥ सर्वे च मानसारामः श्रद्धाश्च धनजिन्मुखः ॥ आनंदजित्त्रिविक्रमाद्यास्तमसेवंत भक्तितः ॥११॥ रामजीभा
तुमुख्याश्च योषितः शुद्धचेतसः ॥ यथोचितं विदधिरे परिचर्यां हरेर्नृप ॥१२॥ महतीं रचयामास समिष्टो
द्यां तत्र वापिकाम् ॥ तत्प्रतिष्ठाविधिं चक्रे ततः शास्त्रानुसारतः ॥१३॥ पूर्तकर्मविधौ तस्मिन्सन्नरेशाः पु
रोहतः ॥ चित्रं पथाऽऽपुंसतया महोत्सवकारयत् ॥१४॥ ब्राह्मणांस्तर्पयामास स स्रग्भिर्भोजनैः सहस्रशः
॥ हविर्भिर्वह्निवत्तानदेवांश्च द्विपुरोगमान् ॥१५॥ वणिक्स्वामी यदा तत्र विष्णुं स्थापयितुं स्वयम् ॥ मयोद्दाम
नेन तर्हि वभूवाद्भुतमीदृशम् ॥१६॥ मया रामादयो विप्राः कुर्वते देवतार्चनम् ॥ तमीक्षमाणा ददृशुः सद्गुण
चतुर्भुजम् ॥१७॥ गदाब्जशंखचक्राढ्यं किरीटेन विराजितम् ॥ पीतांबरं घनश्यामं श्रीवत्साङ्कितवक्ष
सम् ॥१८॥ तमेव भगवत्तत्त्वमष्टांगं दहसुर्दृशम् ॥ चतुर्वक्त्रं चतुर्व्यारमष्टनेत्रं चतुर्भुजम् ॥१९॥ ब्रह्मांज
लिपुरं दाभ्यां दोर्भ्यामेकेन विभ्रतम् ॥ पुस्तकाद्याणि हस्तेन धर्मशास्त्रं परेण च ॥२०॥ वसानं वाससी स्निग्धे तेना
नालंकारभूषितम् ॥ सर्वलसारमुकुटमति शांताकृतिं नृप ॥२१॥ विष्णोर्दक्षिणभागे च स्थितं द्विभुजं हरश्मश्रु ॥५॥

ते ॥ वासीभूषणशोभाढ्यं भक्तिगौरतनुं स्थिताम् ॥२२॥ पूजोपचारैर्विविधैर्भृतं कनकपात्रकम् ॥ बिभ्रं
ती पाणिनैकेन परेण कुंकुमस्त्रजम् ॥२३॥ न किं धर्मसुतं विष्णुमित्थं ते ददृशुर्नृप ॥ रूपैरेव हरेः सा
स्तदपतोनरनास्तम् ॥२४॥ मुहूर्तमेवं ते सर्वे विप्रा वीक्ष्य सविस्मयाः ॥ तमेव मेनिरे विष्णुं स्वेन रूपेण सा
नुपाकृतिम् ॥२५॥ मुहूर्तान्ते यथापूर्वं ददृशुस्तं च प्रणम्यते ॥ पौर्तं विधिं समाप्याग्र्यं चक्रुः स्फुरद्राम्भ
यम् ॥२६॥ चक्रुश्च महतीं पूजां तस्य वेदोक्तवर्त्मना ॥ वेदघोषं प्रकुर्वंतो ब्राह्मणा हृदनिस्पृहाः ॥२७॥
तमाश्रित्य तदा ज्ञात्वा यां स्थित्वा सो पासनं द्रुतम् ॥ विहाय सर्वभावेन तमेव कृपुपासत ॥२८॥ स्वरूपभि
स्यं कृपया द्विजेभ्यः सोऽदिदृशत्स्वेष्टरूपतावत्तुष्टौ ॥ उवास तत्र भगवान्प्रतापे पुरे स्वकीये हरिरावसेता
त् २९ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे विष्णुस्वरूपाविष्कारनामा
तृतीयोऽध्यायः ॥ ३ ॥ सुव्रत उवाच ॥ आसीत्तस्मिन्पुरे येको मेघजित्संज्ञको वणिक् ॥ प्राचीनोऽस्य स
तीर्थ्यो वै हरेः सिद्धाभिमानवान् ॥१॥ प्रातः स समाधौ स्वात्तं अजन्त्राप्स्यां तन्नु मिच्छया ॥ रचयान भगवद्दा
मगदेरा पुनरागनेत् ॥२॥ अंतर्हितेन दृष्टवैः सौख्यात्मानं सर्वतोऽधिकम् ॥ मन्यमानो मुकुंदादीन वं
मेने प्रभुं चतम् ॥३॥ इत्थम्भक्तां स्त्वामि जनानित्तिरस्कुर्वतमेकदा ॥ सज्जिविविदमानं च स्वामी प्राह सदः

॥ स॰जी॰ दि॰ सर्पिषः ॥४॥ कथं सतीः व्रतानां निशानतीयान्सुरैरपि ॥ जानामि तव सामर्थ्यं करिष्ये निर्मदं क्षणा अ॰ ४ ॥
॥ ६ ॥ त् ॥५॥ स सुरैस्त्वापदि भवेद्रातापांतर्हितिस्थमे ॥ नो चेत्समाधौ स्वात्रं तेत वाद्येवगमिष्यति ॥६॥ म
उक्त्वान्तर्द्धानं गतेन पुनाननएवहरि ॥ तं किं करिष्यसि मे शमानेद्रिणो निर्मयम ॥७॥ आज्ञायां
मंभकर्तं पं पूर्वेजेय सर्ववंशाः ॥ आज्ञायां मामपि कथं वर्जयन्नेव जल्पसे ॥८॥ सामर्थ्यं दर्शये
हैत्र मम तु ... कथ ॥ इत्युक्त्वातनं वैजेस्री करार्हेस्य क्षिपत्करौ ॥९॥ करौ कुत्रत्न चौ दग्धौ तपा
पिस्तत्रवि संघे ॥ मारे कुर्वन्नापि वलिक्दे हसातं तविस्मृते ॥१०॥ आश्चर्यमेतत्तद्दृष्ट्वा पौरास्तं ति
रु पूरुषम् ॥ मेनिरे सत्तवाचाः पक्लवं पांसुल्वत्तां क्वचः ॥११॥ मतस्तु तुर्षदिवसे चतुर्थे क्षणए च्च ॥
सद्यः कलेवरं सीयं हासान्मजनसंशयः ॥१२॥ स्वामिन मादृयद्दीवं त्वया स्मात्तर्द्दिव से वयम् ॥ त्रिया
भवेम सर्वे पित्रिणो मे स्मास्त मम्यथा ॥१३॥ देहस्य च हरे धाम्नो मध्ये त्वां तु त्रिशं कुर्वतत् ॥ स्थापयिष्येन
संदेहो यत्त सत्वं यथा बलम् ॥१४॥ तदा समाहमे वशाः सिद्धयो व्याप्तिमादयः ॥ नवंतीतिन सामर्थ्यं
मपितेस वरिष्यति ॥१५॥ इत्युक्त्वा सगृहं गत्वा जिहासुर्देहमात्मनः ॥ ददौ दानानि बहुधा ब्राह्मणेभ्यः
सहस्रशः ॥१६॥ पक्वान्नानि च भूरीणि विधाय ब्राह्मणांस्तत ॥ साधून्सहस्रशः श्राद्ध्यान्भोजयामास ॥ ६ ॥

तद्दिनात् ॥१७॥ जीवान्प्रपन्नवंशान्सर्वं तं समभोजयत् ॥ नीजकैर्वाक्षितान्साधून्नर्नयित्वैव मङ्ग रा
त् ॥१८॥ कृत्वा चातिदिनानि त्वं चतुर्थेपि दिने प्रगे ॥ बहुशो भोजयामास साधून्विप्रांश्च सत्वरम् ॥१९॥
अक्रोशुद्धत्वें तुर्ये ऽप्यबध्वा पद्मासनं वार्णिक ॥ समाधिमकरोत्तं च दृष्ट्वा पौरा उपापपुः ॥२०॥ सर्वांगे
भ्यः समाकृष्य प्राणवायुं हृदंबरे ॥ वाहयामास विच्छिन्ननाडीवेधः स्थिरेक्षणः ॥२१॥ ऊर्ध्वं नेतुं हृदः
प्राणान्ब्रह्मरंध्रं विभिद्य च ॥ गंतुं तु नैव शोकैः सीयतमानो ऽशं वजान् ॥२२॥ बहुवेदं च बहुधा कृतेय
त्ने पप सूक्ष्मि ज्ञान् ॥ नोर्द्ध्वं न चाप्यधो नेतुं सज्ञाज्ञाकक थं चन ॥२३॥ अष्टभिः स्वबन्धाभिश्च सिद्धिभिः सीऽ
णिमादिभिः ॥ अपि संचाल्य नेऽसूत्नां न क्षमो ऽभूत्स राधिप ॥ २४॥ नभो जंबरदधः श्री धत्रिशं कुर्नृपतेर्द
शाम् ॥ माता निःश्वस एव सावेकस्मीन्मपतस्य जे ॥२५॥ हतप्रतिज्ञं तं चातिव्याकुलं सिद्धमानिनम्
प्राकुः पौरा द्विली ये ऽक्किविशा चवतिमोपि च ॥ २६॥ वर्णि राजस्म च सतामपमानस्त्वया कृतः ॥ न पूर्णा
ते प्रतिज्ञा ऽतः मासौ स्येतां त्वमा ऽऽपदम् ॥ २७॥ न स्मात्तं मानया ऽऽयुत्वं सत्तु युक्तं करिष्यति ॥ सात्र चि
ष्यति देहं वा नवे तं जीवयिष्यति ॥२८॥ इतिनागरिकैः प्रोक्तां वाचं स्वस्य हितामपि ॥ मासौ पिता दशांकवंदेन
मेने मानन धीः ॥२९॥ निश्चेष्टरस्य पतितः स आसीद्दिनपंचकम् ॥ ततो गर्जितमानो ऽभूत्तं स्कंदराशरणं

 

पयौ ॥ २० ॥ अस्कुरक्षरयाचाचा संततया चांतिकस्थितान् ॥ नरान्सप्राह वर्णी स्मीहानयत्तमान्विरम् ॥ २
१ ॥ जन्नैः संप्रार्थमानोऽपि नीलकंठकृपानिधिः ॥ सद्भिः सहैव तत्रैव न तरुषिंस्वरूशै सत ॥ २२ ॥ यथास्या
नगतत्राणनाद्रिः सद्यो भवत्तदा ॥ सस्य उत्थाय सस्वे शं लोला कृत्स्नं तमानमत् ॥ २३ ॥ माह नाथाद्दिना
स्वामिंस्त्व हासोऽस्मि कृपा कुरु ॥ क्षांलाममापरां धात्स्वमाज्ञापयितुमर्हसि ॥ २४ ॥ सकृत्वेमेघजिज्जकत्व
पारे हीनसांप्रतम् ॥ सत्कृत्यो नगवरान्तः कुर्वज्जीवसु स्वंभुवि ॥ २५ ॥ इत्युक्त्वा नगवांस्तेन सह स्वावास
मायपौ ॥ ततोऽति विस्मयं प्रापुः सर्वे पुरवासिनः ॥ २६ ॥ निशाम्याश्चर्यं तन्नगरमनुजा ऐशमतुलं
हरेस्तस्मिन्नापुर्जंगदधिप संभ्रांतिमनिशम् ॥ ततस्ते पार्श्वे केतउपसदनायोत्सुकरुदी बभूवुः केचि
त्प्रभुरिति परीक्ष्योपससृपुः ॥ २७ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे
स्वांतत्रसमाधिनिश्चमेघजित्सराजयनामा चतुर्थोऽध्यायः ॥ ४ ॥ सूत उवाच ॥ वणिजः श्रावकास्तत्र स
मवेताः सहस्रशः ॥ तदाश्चर्यं कर्तुकामास्तं प्रणम्येदमूचिरे ॥ १ ॥ अस्मत्तीर्थंकरान्द्रष्टुमिच्छामो वर्णिश
ट्टपम् ॥ स्याद्युतं तत्त्वदाज्ञायां तत्परः स्मो न संशयः ॥ २ ॥ उपावेरपास्य तान्स्वामी कृपानीक्षणकारि
ते ॥ समाधौ दर्शयामास तेभ्यस्तीर्थंकरान्बहून् ॥ ३ ॥ विजानन्नाशी प्राणास्ते बहिः काष्ठवदासत ॥ तीर्थं 

करांस्तु हृदये दृष्टुः श्रुतलक्षणान् ॥ ४ ॥ इत्थं पामरयंतस्यः समाधौ ते तु भूपते ॥ ऋषभप्रमुखांस्तां
श्वद्दृशुमुदिरेन्द्रशम् ॥ ५ ॥ उद्बोधो भून्महान्पुर्यांतिमृताः श्रावकाऽइति ॥ तदा संबंधिनस्तेषां तत्राजग्मु
स्त्वरान्विताः ॥ ६ ॥ मृतकानिव तान्वीक्ष्य निश्चेष्टान्पतितान्भुवि ॥ रुरुदुः पार्श्वपामास्कस्ते तन्मूर्ती वचे
तितम् ॥ ७ ॥ सद्युत्थाप पामासतदा तान्वीक्ष्य ये वसः ॥ तीर्थंकरा दर्शिता नः स्वामिनेत्यूचुरुत्थिताः
८ ॥ ततो नारायणमुनिं विश्लिष्टेम्भूरमेवते ॥ समाश्रिमत्दर्शने जुर्देहदेहिक निःस्पृहाः ॥ ९ ॥ आसंस्तस्मि
न्पुरे ऽन्ये च श्रीवल्लभकुलाश्रिताः ॥ निंबार्कपाश्च माध्वाश्रुतपा रामानुजाश्रिताः ॥ १० ॥ रामानंदाश्रिताः
केचिच्छंकराचार्यसंश्रिताः ॥ सौराज्ञाक्ता गणपत्याः शैवास्ते वर्णिकास्तथा ॥ ११ ॥ शुश्रूषयोपाश्च सं
न्यस्तावर्णिनो वीतरागिणः ॥ श्रुतीसाख्याश्च संहत्स तत्राजग्मुः सहस्रशः ॥ १२ ॥ ते सर्वे वर्णिराजस्य
क्रियां वीक्ष्यातिमानुषीम् ॥ नवी चुरिश्वरे वान्नस्त्वं दर्शयितुमर्हसि ॥ १३ ॥ तदा सप्रहसन्स्वामी धर्मस्या
पनउद्युतः ॥ तदभीष्टं पूरयिष्यन्मनसेत्यमचिंतयत् ॥ १४ ॥ इष्टदेवान्दर्शये यं तद्धैवैतेऽभ्यात्मनः ॥
योगैश्वर्येण चेदद्य तर्हि मां विद्युरीश्वरम् ॥ १५ ॥ ततो ममाश्चर्यं कुर्युस्ताला सर्वात्मकं हि माम् ॥ धर्माजासां
श्रहितैते कुर्युर्मद्भक्तिमिद्दराम् ॥ १६ ॥ इत्थं विचार्य भगवान्कृपयैवाखिलानपि ॥ उपावेशोजसास॰

[illegible]

ध्यः समाधिं तानचीकरत् ॥ १७ ॥ तस्य वीक्षणमात्रेण ते संकुचितनाडिकाः ॥ लीनप्राणास्त्वरदृशुः स्व 
स्वदेवं निजांतरे ॥ १८ ॥ यो रुक्मवक्त्रमीयाद्यास्त्वयोगेपीगणावृतम् ॥ वृंदावनस्थं ददृशुर्व्राजजीजा
मनोहरम् ॥ १९ ॥ रामानुजपथस्थास्तु स्कन्देगरुडादिभिः ॥ विष्वक्सेनेन चैवं तं लक्ष्मीनारायणं यु
तम् ॥ २० ॥ रामानंदाश्रिता रामं सीतया लक्ष्मणेन च ॥ युक्तं मारुतिनापश्यन्दिव्यसिंहासनस्थितम्
॥ २१ ॥ शंकराचार्यवर्त्मस्था ब्रह्मज्योतिर्व्यपश्यत ॥ उमाप्रमथसंयुक्तं शैवा ऐक्षंत शंकरम् ॥ २२ ॥ सौरा हि
रण्मयं साक्षात्सुरूपं सूर्यमंडले ॥ ददृशुर्गाणपास्तु महागणपतिं हृदि ॥ २३ ॥ शाक्तिकेनक्तानिर्मां दे
वीं ददृशुः स्वनिजांतरे ॥ स्वस्वं सर्वेपि इष्टदेवं तत्र तत्र ह्यवैक्षत ॥ २४ ॥ स्वस्वेष्टदेवांस्ते वीक्ष्य स्वस्वैश्वर्यस
मन्वितान् ॥ आनंदं परमं प्रापुर्जाताः पूर्णमनोरथाः ॥ २५ ॥ लब्ध्वेष्टदर्शनं तांस्तु ततः स्वामी स्ववी
क्षया ॥ पुनरुत्थापयामास मृतकानिव तत्क्षणम् ॥ २६ ॥ ते चातिविस्मिताः स्वे स्वे हृदि हृष्टं परस्परम् ॥ व
दंतो नीलकंठं तं सर्वरूपधरं विदुः ॥ २७ ॥ नारायणं विदित्वा तं प्रत्यक्षं परमेश्वरम् ॥ मतं च देशिकान्सो
पानं हित्वा च कुलस्तदाश्रयम् ॥ २८ ॥ मुकुंदमुक्तानंदाद्यार्भद्वा अपितम्मतत् ॥ ऐश्वर्यमद्भुतं दृष्ट्वा निश्चि
क्युः रूपमेव तम् ॥ २९ ॥ ततस्ते सेवनेनैकं चक्रुः प्राप्ता मुदं पराम् ॥ तदाज्ञायामवर्तंत ते निमदाचन 

राधिप ॥ ३० ॥ यवनस्तत्र राजासीदुस्तदीन इति श्रुतः ॥ आजकुस्तस्य शुश्राव काजिनामेदमद्भुतम् ॥ ३१
॥ आलयान्निर्गमं तुर्यवनैः सोभिवेष्टितः ॥ स्वामिनः पार्श्वमागत्य तं प्रणम्य वचोऽब्रवीत् ॥ ३२ ॥
इष्टदेवाः प्रदर्श्यंते जनानां वर्णिराट् त्वया ॥ पिंगांबरानस्मदिष्टान्दर्शयास्मामतेऽनुगा ॥ ३३ ॥ तदा तम
पुपावेत्य स स्वामी प्राह प्रणमाम् ॥ यावत्स्वपि सततं तावद्रासी लीनासुनाडिकः ॥ ३४ ॥ निश्चेष्टदेहः सो
ऽपश्यन्निजान्महम्मदादिकान् ॥ पिंगांबरान्स्वहृदये श्रुतपूर्वांस्ततोऽरुपत ॥ ३५ ॥ स्वामिना वीक्षितोऽ
थासौ युक्तस्थैविस्मयान्वितः ॥ समाधौ वीक्षितं यत्तत्प्राह तेषांगतान्निजान् ॥ ३६ ॥ ततः स स्वामिनं ज्ञात्वा
प्रभुं तस्याश्रयं दृढम् ॥ चकार च तदाज्ञायामवर्तत निरंतरम् ॥ ३७ ॥ एतदाश्चर्यमालोक्य राजापि दृढनि
श्चयः ॥ तमाश्रित्याऽनन्यभक्त्याऽभजत्तं स्म निरंतरम् ॥ ३८ ॥ एवं तत्र च यो यस्तमुपागच्छन्नरेश्वरः ॥ स
स निश्चित्य तं साक्षादीश्वरैश्वर्यमाश्रयत् ॥ ३९ ॥ मद्यमांसं परस्त्र्यादिसेवनं स्वस्वमार्गगम् ॥ अधर्ममे
व निश्चित्य तत्तजहुस्तत्वतापतः ॥ ४० ॥ मद्यमांसं परदार्यं स्तेयं स्वपरहिंसनम् ॥ जातिभ्रंशकरं कर्मादिज
ः सर्वे तदाश्रिताः ॥ ४१ ॥ अधोधापालयामासु ब्रह्मचर्यं गृहीतराः ॥ गृहिणो विधवाः स्त्रीश्च नाऽस्पृशन्
न्यांधवीतराः ॥ ४२ ॥ नार्यः पतिव्रताधर्मं स्ववास्तिमाः सिषेविरे ॥ सागिवत्पालयामासु ब्रह्मचर्यं विभ

॥स·जी·द्वि· र्नकाः ॥४३॥ स्वधर्मज्ञानवैराग्यैर्भक्त्यामहात्म्ययुक्तया ॥ आसन्समेवैव संपन्नास्तत्कालस्तत्र तापतः ॥४४॥ अ·५ ॥
॥ ९ ॥ नारायणमुनेः शिष्यास्त्वलोकविलक्षणाः ॥ लोकस्यास्य प्रवर्त्तन्ते तदीयेपयात्तुवि ॥४५॥ इत्थं स्वी
यं प्रतापं स तु स्वरदिर्शितैर्नेत्रं स रुद्रशिम्बोतुः सार्धं चेतसापिक्ष्टितिलजतरुधाश्रेयसमानवानाम्
नृपोऽन्यो वितन्वन्नु धृतनरवपुर्भ्रादिभिर्जीजाविदग्धः पापिष्ठाधर्मवंशांगुरुजननिजयं वर्णिराट्तु
त्वखान ॥४६॥ इति श्री सत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे आश्चर्यसमाधिलीला
निरूपणनामा पञ्चमोऽध्यायः ॥५॥ सुव्रत उवाच ॥ एवं तत्र प्रतापं स्वं दर्शयित्वा सहस्रशः ॥ जनान्नित्रा
श्रितान् कृत्वा गन्तुमैच्छत्पुरांतरम् ॥१॥ ततो राज्ञा विनीतेन पौरैश्च बहुधार्थितः ॥ चातुर्मास्यमुवा
सासौ तत्र तत्प्रियकाम्यया ॥२॥ प्रतापीव्यानशीलस्य राजन्द्रिष्टुविदिक्षुच ॥ आश्चर्यजनकोनृणां वृन्दै
रप्यश्रुतः पुरा ॥३॥ तं श्रुत्वा वृत्तमत्रतत्र उर्वीसः ज्ञापतोभुवि ॥ नातान्नृपयः सर्वेद्दिदृक्षन्तिस्म तं ततः
४ ॥ भूपास्तमुपाजग्मुर्नगरं तद्द्विजातयः ॥ यथार्हमानयित्वा तां स्तत्रावासयदाज्ञिता ॥५॥ भूपएवं तद्रक्ष
माणश्च प्रतापं तस्यते मुहुः ॥ निष्ठिद्व्यसुस्तं कृष्णमेव केचित्सं शशिरिपिरेद्विजाः ॥६॥ महोत्सवं कर्तुमनाज
न्माऽष्टम्यामयप्रभुः ॥ हृतैरजूहृवसर्वान्भक्तास्तत्रनिजाश्रितान् ॥७॥ भूपशास्तेऽपि तत्रायन्गृहिणस्स ॥ ९ ॥

गिनोऽपि च ॥ सन्मार्गं विदधे तेषां यथार्हं धर्मनन्दनः ॥८॥ उत्थायोषसि चाष्टम्यां प्रातः कृत्यं विधाय सः
उद्धवस्वामिनश्चक्रे समर्चनमहोत्सवः ॥९॥ ततः स कारयामास मण्डपं सुमनोहरम् ॥ विचित्रवस्त्रपु
ष्पलक्रुदजीतंभमंडितम् ॥१०॥ तत्राकरोद्यथाशास्त्रं निशीथे कृष्णपूजनम् ॥ उपहारैर्महद्भिश्च गीत
वादित्रपूर्वकम् ॥११॥ मृदंगकर्ण्दरादीनि वादयंतश्च साधवः ॥ परैर्नानाविधैश्चक्रुः श्रीकृष्णगुण
कीर्तनम् ॥१२॥ कृष्णमांदोलयामास दोलायां चन्निधाय सः ॥ तत्कथाकीर्तनैश्चक्रे जागरं चानिशं स
ह ॥१३॥ निशास्तुतीययामां ते भक्तमंडलसंसदि ॥ उपाविशन्नपट्टकेऽसौ सर्वानानंदयन्निजान् ॥१४॥
त्वामिनो गृहिणोऽप्येवमयोषितश्चातिभावतः ॥ तन्मुखं वीक्षमाणैवैकं पश्यंतिस्मस्थिरेक्षणाः ॥१५॥ तदा
प्रभुःसकृपयैवैक्षत्तानेनमर्मांजसा ॥ एतेषां स्यादिति ततस्तेतमित्थं व्यलोकयन् ॥१६॥ एकैकांगलव
कोटिकोटिभास्करतेजसम् ॥ घनश्यामं पीतपट्टं बर्हिबर्हकिरीटिनम् ॥१७॥ कौस्तुभंवैजयंतीचमा
लिकांबिभ्रतंगले ॥ सद्गलहेमरत्नानेमकरश्रुतिभूषणम् ॥१८॥ पदोर्नूपुरशोभाद्यं करकांगदभूषि
तम् ॥ गंधपुष्पांचिततनुं किशोरवयसं प्रभुम् ॥१९॥ दोर्भ्यां वेणुवादयंतमधरेसघूर्णितथा ॥ नटवेषंत
माजक्ष्मश्रीकृष्णमेते मुदं ययुः ॥२०॥ तत्र केचिन्निर्निमेषपरज्ञास्तस्मिंश्चलेभिरे ॥ समाधिमंतरे केचिदि

॥स॰जी॰द्वि॰ त्यंतस्य पुर्वदीदयम् ॥२१॥ ततस्तमेव तेऽपश्यन् यथापूर्वमवस्थितम् ॥ वर्णिवेषं चात्मजं स्वं संस्थाने विरा अ॰९॥
॥१०॥ रवाससम् ॥२२॥ एणाजिनधरं शांतं करात्तजपमालिकम् ॥ नारायणमुनिं वीक्ष्य नेमुः सांष्टांगमा
श्रुते ॥२३॥ परमेश्वररूपं वा यं नारायणमुनिः स्वयम् ॥ श्रीकृष्णोऽस्तीति साम्यं च वदंति स्म समुत्सुकाः
२४॥ उद्धवीयाश्च ऋषयः पौराश्चान्येच तत्र ये ॥ जना आसंस्तभार्यास्ते सर्वे च कृतसाश्रयम् ॥२५॥ ततो
वयं त्वदीयाः स्म इति शंसन्तो वदन् ॥ नावज्ञातमुपः स्वामी स्वात्वात्कृत्स्नं समाचरेत ॥२६॥ न मेधामा
सस्तद्वीश्यैः साधून् विप्रान् सहस्रशः ॥ पारणं सत तस्यकेऽजना श्चान्ये ततो नृप ॥२७॥ देशांतरागताः स
र्वऋषयोरदनिश्चयाः ॥ स्वधर्मज्ञानवैराग्ययुता भक्त्याऽनंतं श्रुतम् ॥२८॥ तेषां तु कैचिद्दृषयो व्रतसवर्या
श्रमे नृप ॥ अवर्तंताऽपके षा ३३ संत्यागिभक्तादिसाधवः ॥२९॥ नृपोऽपराह्णे सभां कारयामास सत्
तिः ॥ यथार्हं तत्र पुरुषा निषेदुश्च स्त्रियो नृप ॥३०॥ अथ वीरतत्र भगवान् पद्दकेस्वास्तले हरिः ॥ बभौ सतार
काम ध्ये शशांकः कुरवपार्वणः ॥३१॥ तं चंदनेनोत्तमपुष्पहारैर्वस्त्रैर्विचित्रैश्च धनैर्नरेंद्र ॥ संपूजयामासुर
नन्यभावाः सर्वेऽपि भक्ताश्च ततः प्रणेमुः ॥३२॥ तस्माद्धि शुद्धं निजधर्मवर्त्म शुश्रूषवः सन्मुखमेव तस्य
सर्वे निषेदुर्मुखपद्मशोभामवेक्षमाणा विनयानतांगाः ॥३३॥ इति श्रीसत्संगिजीवने नारायणचरित्रे ॥१०॥

धर्मशास्त्रे द्वितीयप्रकरणे जन्मानंतरभुजस्वे श्रीकृष्णपरस्वरूपदर्शननामा नवमोऽध्यायः ॥ ९ ॥ सुव्रत उवाच
नारायणमुनिं त्वा बद्धांजलीपुरःस्थिताः ॥ शिष्याः मुकुंदप्रमुखास्तत्रोचुरिदमादरात् ॥१॥ भक्ता ऊचुः ॥
भगवन् सर्वभूतानां त्वमेव परमा गतिः ॥ स्वाश्रितानां विशेषेण त्वं गुरुश्चेश्वरोऽसि ॥२॥ अतस्त्वमा
श्रितानां नस्त्यागिनां गृहिणां तथा ॥ स्त्रीणां चाऽपि प्रभो ब्रूहि धर्मान् सुखसप्रसाधकान् ॥३॥ सुव्रत उवाच
इति पृष्टः स भगवान् निजशिष्यैः कृपानिधिः ॥ वेदादीनां सारभूतान् धर्मानाह सनातनान् ॥४॥ श्रीनारा
यणमुनिरुवाच ॥ शृण्वंतु मामकाः सर्वे पुरुषा योषितस्तथा ॥ सच्छास्त्रानुसृतान्धर्मान् वच्मि भागवता
न्हि वः ॥५॥ ब्राह्मे मुहूर्त उत्थाय निद्रां त्याज्यःस्मरेति मे ॥ मदीयैः कीर्तनीयानि हरेर्नामानि नित्यशः ॥६॥
तद्भक्तानां च नामानि कीर्तनीयानि तैः सह ॥ अथ ग्रामान्तसीमं यो मुत्सर्गं वै कुर्यादिकाम् ॥७॥ श्रीकृ
ष्णं राधिकाकांतं तमेव हृदयांबुजे ॥ स्मरद्भिः शुद्धहृदयैः कर्तव्या दैहिकी क्रिया ॥८॥ स्नानं संध्या जपो
होमः स्वाध्यायः पितृतर्पणम् ॥ देवतापूजनादीनि नित्यं कार्याणि च द्विजैः ॥९॥ स्नानं च द्विविधा पूजा
महत्वात्प्रसत्संहरेः ॥ सर्वैरन्नं न भोक्तव्यं विना रोगादिपीडितान् ॥१०॥ उपचारैर्यथालब्धैर्विशुद्धैः प्रति
मा हरेः ॥ यथाधिकारं विहितैः पूज्या मंत्रैर्यथाविधि ॥११॥ रसामक्तिर्न कर्तव्या सर्वैः सर्वत्र सर्वदा ॥ यथा

काले यथाशक्ति भोज्यमन्नं फलादि वा ॥१२॥ यो यत्र मुख्यो हि भवेज्जनयिता स वा परान् ॥ स्वयं नेतुं जीता 
नुदिनं पंक्तिभेदं च नाचरेत् ॥१३॥ एकादशीषु सर्वासु सुरूपजन्मदिने पुनः ॥ शिवरात्रौ च नैवान्नं नो
भक्ष्यं मदुपाश्रितैः ॥१४॥ मदर्पितैर्मदीयामां स्मरन्तन्नित्यमस्य च वस्तुनः ॥ नैगमागंतत माजादेः कार्यः स्पर्शो
ऽपि न क्वचित् ॥१५॥ यत्र स्युर्वनिताराम्यरक्ते पुम्पापिता हरेः ॥ न गन्तव्या सह चक्षान मध्येन यानि तानि वै
॥१६॥ मच्छास्त्राणि च सर्वाणि श्रव्याणि सुधियो मुखात् ॥ न च तेभ्यः शुद्धधर्मस्य हर्येन्नर्कस्य कर्हिचित् ॥१७
॥ त्नान शास्त्रे पिय त्रस्मान्नैवनारायस्य च ॥ स्थापनं दिव्यरूपस्य तत्र श्रमं कदाचन ॥१८॥ युक्त्यायानिय
मैः सर्वैः शासा यात्रसाणि स्थितिम् ॥ अपिक्षिया मुख्यान्नैव तानं श्रवणं हि तु रुषैः ॥१९॥ गेयं यशः सदावि
ष्णोस्तदीयानां च भक्तितः ॥ संगः सतां मदा कार्यो हर्यभक्तस्य न क्वचित् ॥२०॥ निर्मानिर्दंभ वत्सवैर्वर्तः
र्तितव्यं सतां पुरः ॥ अवधार्याणि वाक्यानि तेषां चैकाग्रचेतसा ॥२१॥ वृथावादो न कर्तव्यः श्रव्या ग्राम्य
कथा न च ॥ अपशब्दा न वक्तव्या नानृतं चापदं विना ॥२२॥ स्वज्ञातीनां हृदत्वं स्यात्तु रूपे च प्रेम निर्भरम्
॥ यत्समागमतः स्यात्तत्संगो हेयो न कर्हिचित् ॥२३॥ स्थितप्रज्ञोऽपि यः संगं तादृशामस्य जहाति सः ॥ का
म जो मा द्युरिग्रस्तो भ्रष्टस्यैव न संशयः ॥२४॥ मत्संगं स्वं विरधतं यदि कोप्यत्र निर्वदेत् ॥ तावन्माचेण 

मक्षीनः श्रासव्यो मनसा क्वचित् ॥२५॥ वेषमवस्यापि मन्त्रस्य स्वव्रतेभ्यश्च्युतस्य च ॥ संगो नैवाऽत्र कर्तव्यः
पापिनोऽस्य च क्वचित् ॥२६॥ गात्रक्रसात्मविज्ञानो यवमंताजगतल्पे: ॥ तस्मावनारैचा श्रदीयः स्या
देयः सहरतः ॥२७॥ मत्संमदायलिंगं च बिभ्रद्यो बहिरुत्तमम् ॥ मच्चनं श्राश्रिसं सक्तः पश्रसाज्ञः सह
रतः ॥२८॥ ज्ञानात्मासंदासाचौपरस्यातितितिक्षाऽऽस्तिकतादिभिः ॥ गुणैर्दैवादिदुष्प्रापैर्युक्तैर्भाव्यं च मन्निवृतैः
॥२९॥ नातेः ब्रह्मसाक्षात्कारेऽपि स्वपरं ब्रह्मरूपयो ॥ जोषव्यं मामकैर्नैव दशाद्यादि विषये क्वचित् ॥३०॥ म
हद्भिः पूर्वजैः सिद्धैर्यद्धर्माचरणं कृतम् ॥ न चैतदेव हित्वा तु नाधर्माचरणं क्वचित् ॥३१॥ ब्रह्मचर्यप्रधा
नानि साधनानि चिनैव चेत् ॥ न सौ महाफलाभक्किं स्वस्मै कश्चिदुपादिशेत् ॥३२॥ तर्हि भक्त्यानया सा
कमुपदेश्यरमेव तम् ॥ महोजत्यादिसङ्क्तो न तु स्वनियमान् क्वचित् ॥३३॥ धर्मो ज्ञानं च वैराग्यं भक्तैर्वैधृ
नितत्वतः ॥ अंगानि त्रीण्युत्तमांगहृत्वादास्याम्यनुक्रमात् ॥३४॥ धर्मप्रतिज्ञां कृत्वा दीनं पालयति यस्तु
तां मम ॥ स तु स्वपश्च वक्ते यः पुमान् योषित् सतारशा ॥३५॥ लोभकामक्रुधादीनां वशो भाव्यं न वैरिणाम् ॥ प्रा
णात्तिनिरपसेति वेदितव्या स्वतोऽखिलैः ॥३६॥ संप्राप्तसत्तीव्रवैराग्यं परं ज्ञानं च धर्मवान् ॥ क्लंपमजेत प्रे
मणा यः सेव्यः सगुरुवस्तुमान् ॥३७॥ गोलोके चाथ वैकुंठे श्वेतद्वीपे मनोहरे ॥ यच्चैश्वर्यं ब्रह्मपुरे श्वर्यं स्वा॰

॥स॰स्त्री॰शि॰ ध्यं च तद्व्रतम् ॥३८॥ सम्पार्य दारैश्च सुतैर्येतन्नाम मनुं संस्थिताः ॥ राधिकाद्याःऽन्यकपञ्चस्तेषु मुक्ताश्रुपेक्षि अ॰३॥
॥१२॥ ताः ॥३९॥ एतत्सर्वं स्वहृदये चिंतनीयं निरंतरम् ॥ येनांतकालेऽपि भवेत्तत्स्मृतिर्मुक्तिदायिनी ॥४०॥ प्रस
न्नैरपि शास्त्रैः कृष्णस्य चरणादिका ॥ भक्तिरेव विधातव्या नित्यदाऽच्युतादिवत् ॥४१॥ नाशेष्वकं च नैवे
द्यं ग्राह्यं स्याद्वासमतनैः ॥ स्वजातिधर्मानुगुणं लब्ध्वात्रं नाम्ना कश्चित् ॥४२॥ अथावतैतत्कृष्णकाष्ठनैवे
द्यं च रणावु च ॥ नशीयं नैव दातव्यं देवं नत्वानुशाश्वते ॥४३॥ रेकाऽपि हरेर्भक्ता नावमान्या हि कर्हिचित्
अवमानात्ताह्यशानां भवत्येव महद्भयम् ॥४४॥ वैष्णवस्य हरेर्नाम्नं सम्मेलिता कार्या यथा हरेः ॥ अन्नादि देयं
तस्मै च तद्वचनानुसृत्यं तुष्यत ॥४५॥ सतां च महतामग्रे दीपावाच्यायन्आत्मनः ॥ स्वमुखेनेन कर्त्तव्यं स्वगु
णानां प्रशंसनम् ॥४६॥ देवस्य च गुरोरग्रतो विष्णुभक्तस्य चाग्रतः ॥ पादौ प्रसार्य मस्तुं भित्तौ पवेशं च स
सरित् ॥४७॥ तेषामग्रे विचार्यं च वाऽमसत्यं च न स्त्रियम् ॥ तेषां गुरुत्वं च यत्किंचित्तस्य कार्यं न कुत्रचित् ॥४८
॥ द्रोहः कार्यो न कस्यापि स्त्रियं वर्ज्यं च सर्वथा ॥ हितावहं परेषां च कर्त्तव्यं सत्यभाषणम् ॥४९॥ न कार्यं वर्ण
सांकर्यं न च स्वपरहिंसनम् ॥ नाम्नोद्वेगकरं वाच्यं नापवादश्च कस्यचित् ॥५०॥ अभिप्रजैर्भक्तिजात्वार्ये श्रुत्वाऽप्ययां
तं सदाश्रितः ॥ प्रतिमा स्थापितास्त्रिस्थाऽऽश्रमांतं तमनुव्रजेत् ॥५१॥ वैष्णवेवीक्षमाणे च नैष्ठिकव्रतचारि ॥१२॥

भिः ॥ वर्ज्यं परस्या पत्याऽनंगा जिद्दानं च नाचरेत् ॥५२॥ एकांतिकानां भक्तानामन्येषां महतामपि ॥ गुणोत्क
र्षं सभायां हि कीर्तयेन्नाऽगुणं क्वचित् ॥५३॥ ब्राह्मणान्भगवद्रूपान्विदित्वा मानयेत्सदा ॥ दृष्ट्वैव जय
कृष्णेति नमस्कुर्यात्कृतांजलिः ॥५४॥ नास्तिका पञ्चपैनैव मदीयः प्रविशेत्क्वचित् ॥ तदाचार्यैर्न भाषेत न कृ
पाक्षुणुयाच्च ॥५५॥ साधारणा मदीयानां त्यागिनां गृहिणामपि ॥ धर्मा एते मया प्रोक्ता विशेषान्कथ
याम्यथ ॥५६॥ वेदपाठो गुरोः सेवा कर्त्तव्या ब्रह्मचारिभिः ॥ वानप्रस्थैस्तपः कार्यमहिंसा श्रमवत्याऽपि
॥५७॥ संन्यासिभिश्च नियतं स्यात सममपरिग्रहैः ॥ विष्णुपूजाकारजपौ कर्त्तव्यौ तैश्च नित्यदा ॥५८॥ द्रव्यस्य
हेमरूप्यादेर्ग्रहिवर्ज्जैर्महात्मभिः ॥ त्याग आश्रमिभिः कार्यस्त्यागिभक्तैश्च सर्वथा ॥५९॥ स्पर्शः संगोऽथवा
स्त्रीणामेतैस्तत्प्रतिमापि च ॥ भिक्षान्नं कार्यं न स्पृष्ट्वा देवताप्रतिमां विना ॥६०॥ स्त्रीभ्यो धनुःप्रमाणेन गम्यं
दूरेण सर्वथा ॥ स्त्रीपुंसवाऽन्यमार्गादौ रक्षेत्स्त्रीसन्नतो वपुः ॥६१॥ यत्र यत्रस्यलेस्त्रीणां याया कानिचित्क्रिया
भवेत् ॥ तत्र तत्र क्रिया सा सा न कार्या नैष्ठिकैर्मम ॥६२॥ गृहद्वारांतरस्थेन कुड्येनैकेन यत्र च ॥ स्यात्स्त्रीपुंसां
तरं तत्र न स्वप्यं निद्रयाऽनापदि ॥६३॥ स्त्रीभिः कृष्णस्य भक्ताभिरपि पूजितमच्युतम् ॥ नैष्ठिकव्रतिभिर्नैव गत
मंवीक्षितुं क्वचित् ॥६४॥ विनापदं सभायां वापि गृहस्थानां गृहाणि च ॥ गंतव्यानि क्वचिन्नैव त्यागिभिर्वैम

॥स·नी·टि· शाश्रितैः ॥६५॥ एकाकिभिर्न गंतव्यं तैः कदाचन कुत्रचित् ॥ शयितव्यं नखट्वायां विनारोगादिमापदम् ॥६६ अ·३॥
॥२३॥ ॥ अनापदि न गंतव्यं निशि वर्त्मनि चैतैः क्वचित् ॥ न यैर्वच निजस्थानात्गंतव्यं न बहिर्निशि ॥६७॥ आपद्धर्मेस्त्व
विपद्विगात्तुरोऽमत्र बृहद्रुतात् ॥ आलोलयेपि न सामं ब्रह्मचर्यांगमष्टमम् ॥६८॥ रूपभार्षं न वक्तान स्त्राक्त
अस्या गिभिर्नरैः ॥ नरात्मधीभिर्मच्छिष्यैर्देहासक्तिस्त्यैव च ॥६९॥ निवृत्तिधर्मनिरतैश्च रस्य गुरोर
पि ॥ सवृत्तस्य परं वाक्यं ग्रहीतव्यं न कर्हिचित् ॥७०॥ विधवानां तु नारीणां नातु मास्ये विशेषतः ॥ धारणापार
णादीनि व्रतानि विहितानि वै ॥७१॥ ताभिः पात्यं ब्रह्मचर्यं हित्वा नुःसंगमः सुधा ॥ पुमांस्तत्प्रतिमा वापि न स्पृश्य
आ विनाऽमरणम् ॥७२॥ धर्मकार्येऽपि न स्वयं स्वनिर्वाहोपयोगी यत् ॥ ताभिर्देयं कदापीति मदाज्ञाऽस्ति जनाः
खलु ॥७३॥ बाला युवत्यो वृद्धा वा सधवा विधवास्तथा ॥ स्त्रियः स्वतंत्रा नैव स्युः पित्रादेः स्ववशे सदा ॥७४॥
स्यातं ओगान कर्त्तव्यं स्वसंबंधिजनान्विना ॥ तीर्थक्षेत्राटनं स्त्रीभिः सर्वाभिरपि कर्हिचित् ॥७५॥ सुवासिनी
भिर्नारीभिराश्रिताभिस्तु मां निजः ॥ अंधो रुग्णो जरन्वापि सेव्यः श्वशुरवत्पतिः ॥७६॥ शीलमेव सदा रक्ष्यं ता
भिः संसग्नचापलम् ॥ श्वश्रूश्वशुरयोश्चैव कुलं पित्र्यं जो खनीयं न तु क्वचित् ॥७७॥ व्यवहितेतरानार्यो गृहिभिः स्वप्रस्त
समाः ॥ दृश्या अवहार्ये च संबंधिषु यथोचितम् ॥७८॥ स्त्रीसंबंधस्य नैकत्वे रूपे सगृहिभिः कथा ॥ कर्त्तव्या ॥२३॥

दूरतः स्थित्वा न तु सर्वत्र सर्वदा ॥७९॥ रहःस्थाने तु मात्रा वा भगिन्या कन्ययापि वा ॥ सहासितव्यं न क्वापि गृह
स्थैरप्यनापदि ॥८०॥ बुद्धिपूर्वं तु विधवा न स्पृश्या गृहिभिः क्वचित् ॥ आसन्नसंबंधहीना या योषाऽल्पकालमंत
रा ॥८१॥ निसंपंचमहायज्ञाः कर्त्तव्या गृहिभिर्नराः ॥ पूज्या श्च साधवो भक्त्या शर्म कार्यं च शक्तितः ॥८२॥ सा
तिप्रियपरार्थस्य पात्रे यत्स्त्रीविनाऽर्पताम् ॥ मानेर्ष्यादंभरहितं दानं चावबुध्यताम् ॥८३॥ अहिंसयज्ञाः
पूर्त्तं च कार्यं माहैर्गृहस्थितैः ॥ पुण्यक्षेत्रेषु दानानि विप्रसंतर्पणादि च ॥८४॥ उपायानां च तु चक्रेणादिनाशा
णाय धर्म्यपैः ॥ स्वकार्यसिद्धिः कर्त्तव्या राजनीत्या सदाश्रितैः ॥८५॥ राजधर्मेष्वपि प्रोक्तं प्राणिघातवचस्तु तैः
॥ गुरुरादन्यवचनग्राह्यं रक्ष्या स्वपितृवत्प्रजाः ॥८६॥ नियमेषु मदुक्तेषु यस्य यस्य च्युतिर्भवेत् ॥ तस्य तस्य विधा
तव्यं शास्त्रोक्तं प्रायश्चित्तम् ॥८७॥ एतैर्मदुक्तैः सद्धर्मैर्ज्ञानवैराग्यसंयुतैः ॥ स्वाधिकारानुसारेण दंभहीनं
स्वनुष्ठितैः ॥८८॥ निष्ठुसप्तसेवया विष्णोस्तदीयानां च भक्तितः ॥ दयया सर्वभूतेषु जोभावैर्वर्जनेन च ॥८९॥ त
त्सन्मुखीकरणतो यस्य कस्यापि देहिनः ॥ प्रसीदत्याशु सरतिज्ञातव्यं नात्र संशयः ॥९०॥ नृदेहं दुर्लभं लब्ध्वा
जीवाः सदुपदेशतः ॥ ह्युन्मुखा ये नायं ते तेन रंतिभवां बुद्धिम् ॥९१॥ चिंतामणिसमो ते यो नृदेहोऽयं विचक्ष
णैः ॥ स्वर्गो मोक्षस्तदन्यत्त्वस्मिन् प्राप्यतेऽमुना ॥९२॥ नवाब्धौ जव एव वाऽसौ गुरुर्यस्यास्ति नाविकः ॥ अनु

॥स॰जी॰द्वि॥ कृतो मनुष्यदेहस्तैनार्थं कोन साधयेत ॥९३॥ सुरैर्देवैर्यपि कांक्ष्यते देहे बुनिर्द्विजेश्चपि ॥ सामान्यमस्तीति अ०७॥
॥२४॥ बुधोन्द्रदेहस्योहरिर्भिजेत ॥९४॥ कालाहितुं रपनितं देहं चक्षणभंगुरम् ॥ विदित्वा बुद्धिमानत्रस्वार्थं सं
साधयेद्रुतम् ॥९५॥ स्वसयानरदेहस्य प्राप्तिर्देवार्थितस्य वै ॥ रूपमेव रूपात्रे पातद्रीपातु विचक्षणैः ॥
९६ ॥ जङ्क्वापि तं च तद्भक्तौ नियमैर्धर्मपालने ॥ हेतुं वदन्ति ये कालं प्रारब्धं वा कृपां हरेः ॥९७॥ अपौरु
षास्तु ते मूढा अससंस्थैरपि जन्मभिः ॥ लभन्ते नैव ते कापि वैश्यम्यं ते च संसृतौ ॥९८॥ तस्माद्बुद्धिः सततं
स्वधर्मनियतस्थितैः ॥ उक्ता हैनैव कर्त्तव्या तद्भक्तिः प्रयत्नितैः ॥९९॥ स्नानं ध्यानं हरेः पूजा जपश्च गु
णकीर्त्तनम् ॥ सत्संगश्चेति सर्वेषां षट् कर्माणि दिने दिने ॥१००॥ यावद्देहस्मृतिर्वः स्यात्त्वस्वधर्मा मर्या
दिताः ॥ तावन्नैतेत्कृचित्त्याज्या रसा ह्या मेऽस्ति सत्तमाः ॥१०१॥ सुव्रत उवाच ॥ जगद्गुरोर्भगवतः साक्षा
त्तस्येति भारतीम् ॥ सच्छास्त्रसंमतां श्रुत्वा ते सर्वे मुदमाप्नुवन् ॥१०२॥ एवमेवाचरिष्यामो वयं सर्वेऽपि
सत्तमे ॥ प्रसुक्त्वा ते भगवते तस्मै प्रीत्या ववंदिरे ॥१०३॥ नरनारायणौ वर्त्तमानाः साक्षाच्छ्रीकृष्णमेव तम् ॥ ज्ञा
नेत्तस्ते हृदं ध्वितात्सर्वज्ञा वेन भेजिरे ॥१०४॥ नारायणमुनेर्गीता मेतां जनहितावहाम् ॥ यः पठेच्छृणुया
द्वापि श्रद्धयात्तनिजेप्सितम् ॥१०५॥ एषा महाकल्पलता मनोवांछितपूरणी ॥ सर्वेषां प्राणिनां सेव्या स ॥२४॥

र्वथास्वहितार्थिनाम् ॥१०६॥ एषा हि सर्वशास्त्रेभ्यो गीता ह्येषा गरीयसी ॥ यन्निःसृता स्वयं साक्षान्नाराय
णमुखांबुजात ॥१०७॥ यस्यामावर्त्तितो हंसानातनं श्रीनारायणेन स्वयमेव गीतम् ॥ यथाधिकारं सततं
स्वधर्मं प्राप्तं हितैरेव फलं नु जानैः ॥१०८॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रक
रणे श्रीनारायणगीतानिरूपणनामा सप्तमोऽध्यायः ॥७॥ सुव्रत उवाच ॥ स्वसस्थानं ततो गन्तुं गृहि
णो हरिराज्ञया ॥ सयोषास्ते प्रयान्ति स्म निजदेशान्प्रणम्य तम् ॥१॥ मुकुंदमुक्तानंदाद्यास्त्यागिनः क
तिचित्तु सः ॥ अरक्षत्स्वांतिके स्वामी मानचन्द्र गौरवेण च ॥२॥ अन्यांस्तु त्यागिनो भूमावाज्ञाबोधाय भूः
यशः ॥ गन्तुमाज्ञापयामास नानादेशान्नराधिप ॥३॥ ततः पौरैः स्वनृपालं स्थापतुं धर्मध्वनिप्रभुः ॥ आ
ज्ञाप्यानुगतः शिष्यैः कालवाणीं पुनर्ययौ ॥४॥ स्वावासमकरोत्तत्र गृहे जीवनशर्मणः ॥ तत्र सा बहवो भ
क्ताश्च कुलत्से वनं नृप ॥५॥ मेघजस्मणभीमाश्च रघुनाथाऽऽ बपारवाः ॥ जयरामारव्यो विप्रास्तमम
से वं तं भक्तितः ॥६॥ वैश्याश्च नक्काधनिनस्तमसेवंत सानुगम् ॥ पर्वताख्यस्तत्र मुख्यस्तथा राजभया
भिधः ॥७॥ जीवराजस्तपोनन्ती जेठो दीमूलजिद्धुदः ॥ खंजोवास्तुर्नृसिंहश्च नेष्ठनु शी सहोदरौ ॥८॥ ह
र्षो दामोधवार्वबः केशवो लक्ष्मणस्तथा ॥ विश्राम प्रमुखाश्चान्ये वहवस्तं सिषेविरे ॥९॥ तेजस्वतीम॰

याकृष्णाहिरुणी वंतिकाद्यः ॥ योषितो नक्तिमत्यस्तं नगरे तमुपासत ॥ १० ॥ एते सहस्रशो ऽन्ये च तत्र से 
वद्रूपया विभोः ॥ समाधिनिष्ठास्तत्रासन् सर्वे योगकलाविदः ॥ ११ ॥ क्रमसाधितयोगांगा योगिनः प्रा
प्तसिद्धयः ॥ यथा सुप्ता स्तथात्यो ते सर्वा स्तत्स्वरूपया ऽभवन् ॥ १२ ॥ प्राणसंयमने देहधारणेत्य जने ऽपि च
॥ स्वातंत्र्यं लेभिरे ऽत्यो ते बालकाश्चापि केचन ॥ १३ ॥ स्वस्वरूपे समाधिं तान्संघशो ऽकारयद्यदा ॥ स्वतंत्रः
सज्जनस्वामीत दाश्चर्यमजीजनत् ॥ १४ ॥ सद्यः समाधिमामानां पुंसां स्त्रीणां तथा पृथक् ॥ बभूवुः पंक्त
यस्तत्र शतशोऽथ सहस्रशः ॥ १५ ॥ केचित्सिद्धासनस्थाश्च केचित्पद्मासनस्थिताः ॥ जनाः केचित्तु वी
राख्यमासनं तत्र चाश्रिताः ॥ १६ ॥ केचिद्भद्रासनं केचित्स्वस्तिकासनमास्थिताः ॥ केचित्कुक्कुटासनस्था
स्तत्राऽऽसन्नृपते जनाः ॥ १७ ॥ काष्ठानामश्मनां वापि प्रतिमा इव ते ऽखिलाः ॥ निश्चेष्टाः समनायं तत्समा
धेः परमत्वतः ॥ १८ ॥ तत्र कांश्चित्तु यामांते समुत्थापयति स्म सः ॥ कांश्चिद्यामद्वयांते च दिनांते ऽपि च
कांश्चन ॥ १९ ॥ कांश्चिद्दिनद्वयांते च पक्षांते ऽपि च कांश्चन ॥ मासांते वा द्विमासांते त्रिमासांते ऽपि कांश्च
न ॥ २० ॥ कांश्चित्वाऽऽसन्न तु कांते सुरस्यापयदीश्वरः ॥ कांश्चित्तु दृष्टिमात्रेण कांश्चिच्छब्देन वा दृढा ॥ २१ ॥
यः समाधिपरानंदात्स्वादजो ऽभेन कश्चन ॥ पुनर्बहिर्निर्जनं देहं तेनास्तोऽपिना यथौ ॥ २२ ॥ तादृशं मेने वयो ॥१५॥

गिनं तमपि प्रसमं प्रभुः ॥ आनिनाय पुनः शीघ्रं महायोगेश्वरत्वतः ॥ २३ ॥ योगोऽभूद्युस्थितोभक्तो यद्य
त्वेन समीक्षितम् ॥ समाधौ तत्र दृष्टिरुंसदः स्थान्स्ससकृचिवान् ॥ २४ ॥ वार्त्तां ब्रह्मपुरस्यैकेन्यत्काश्च
कुरु गोलोकिकीम् ॥ श्वेतद्वीपस्य केचित्तु वैकुंठस्य च केचन ॥ २५ ॥ गोलोकस्योचिरे केचिद्दिव्यमैश्वर्यवै
भवम् ॥ त्रिलोक्यां देवदेशादिस्थानवार्त्ताश्च केचन ॥ २६ ॥ समाधिदृष्टं प्रकृतिपुंसोर्लोकं च केचन ॥ ऐश्व
र्यवैभवं चापि कथयामासुरंजसा ॥ २७ ॥ लोकैश्वर्यपतापादि केचित्संकर्षणस्य च ॥ प्रद्युम्नस्योचिरे केचि
चिदनिरुद्धस्य केऽपि च ॥ २८ ॥ चतुर्विंशतितत्त्वानां लोकैश्वर्यादि केचन ॥ प्राकृः पृथक्पृथक्दृष्टं य
थावत्तत्र संसदि ॥ २९ ॥ त्रिलोकीस्थहरिस्थानवार्त्ताश्च कृष्ण केचन ॥ केचित्तु लोकालोकबहिःस्थानवा
र्त्ताश्च चक्रिरे ॥ ३० ॥ केचित्त्वनंतब्रह्मांडब्रह्मविष्णुशिवक्रियाः ॥ उत्पत्त्याद्याः क्रमेणोचुस्तत्र तं चापि वैभ
वम् ॥ ३१ ॥ देवदैत्यनरादीनां तत्र तत्र च याः क्रियाः ॥ आश्चर्यरूपास्ताः सर्वाः कथयामासुरीक्षिताः ॥ ३२
॥ ब्रह्मांडरचनां सर्वां यथादृष्टां च केचन ॥ वर्णयामासुरेके च स्वदेहरचनामपि ॥ ३३ ॥ भूगोलस्य च संस्था
नं खगोलस्याऽखिलस्य च यथावत्कथयामासुः केचित्तत्र नराधिप ॥ ३४ ॥ तेषां तथाविधा वाचः श्रुण्व
न्नारायणो मुनिः ॥ चक्रे तत्र द्विगवतां पक्षापक्षत्वनिश्चयम् ॥ ३५ ॥ यमस्य पसनच तत्राभूद् पक्षायोग

॥स॰जी॰द्वि॰ धारणा॥ तेनं पुनस्तदुचितां कारयामास धारणाम्॥३६॥ प्राणनामच नाडीनां स्वातंत्र्येण पुनः पुनः। सं अ॰८॥
॥२६॥ कोचनं चिकाशं च शिक्षयामास कांचन॥३७॥ सर्वांगेभ्यस्तथा कृष्य रश्मिप्राणान्समनोधृतिम्॥ कांचि
च्छाशिक्षयत्स्वामी तथांऽगुष्ठादिमात्रके॥३८॥ तादृशी धारणायां तु प्राणान्सरहितेऽखिले॥ छेदमा
ने दत्तमाने देहेपि स्नान्न वेदना॥३९॥ परावृत्तैकमक्ष्णः सस्तांतर्दृग्भवधारणम्॥ निर्निमेषं द्वितीय
मवहिर्दृक्साच धारणम्॥४०॥ एतयोर्वै परीक्षेन धारणं च पुनस्तथा॥ अक्षियोगमिमं स्वामी कारयामा
स कांचन॥४१॥ उभे नेत्रे परावृत्त कृत्वा चक्ष्वांतरे प्रति॥ नाडीप्राणाकर्षणं च शिक्षयामास कांचन॥४२
उभे अपि बहिः कृत्वा निर्निमेषे स्वजीवने॥ नाडीप्राणाकर्षणं च कांचिद्दक्षानुशिक्षयत्॥४३॥ षट्चक्र
चक्रे षण्मतमे शेषधिलात्यसंस्ततः॥ नानानादस्फूर्तिं कांचित्कारयामास सप्रभुः॥४४॥ चक्र एकत
मेरुद्रप्राणान्कांचन पूरुषान्॥ अजिगणन्सप्रणवान्सुस्थितैस्तान्वीवरत॥४५॥ इडायाः पिंगला
याश्च सुषुम्णादेश्च वर्त्मना॥ चेरुः सर्वादिजीकांस्थगमयामास कांचन॥४६॥ प्रेषयित्वा संयमनीं समा
धौ कांश्चन स्वकम्॥ श्रावयित्वा नामसद्योनारकानुद्धारच॥४७॥ यथा राज्ञासनं प्राप्तो नेगराज्ञो नोचः
येन्नृपः॥ तथानुरूपदरारदः सोपि नारकीणेन्नृप॥४८॥ एवं विधा योगकलाः समग्राअपि सोनघ॥ आप ॥२६॥

यामास भक्तान्स्वान्विना साधनसंपदम्॥४९॥ तत्प्रतापेन ते सद्यः सिद्धयोगाः सुमेधसः॥ देहान्परेषा
माविश्य विचिदुस्तन्मनोगतम्॥५०॥ स्थित्वा परेषां देहेषु तत्प्राणेश्चावरुध्य ते॥ अदीदृशंश्च भगवद्दा
मान्यपि यथा हरिः॥५१॥ तेनाज्ञस्तस्य यः कोपि पुरुषः स परं नरम्॥ आकारयत्समाधिं च समापिस्वयं
त्ववोधयत्॥५२॥ स्वयं सद्रूपया स्वामी स्वप्रतापं प्रदर्शयन्॥ कालनष्टा योगकलाः प्रावर्त्तयतमूतजे
॥५३॥ प्रतिगेहं योगकलायुक्तिवार्त्ताः पुरे पुरे॥ प्रामे च राजर्षेभूवुः श्रोतृमंगलाः॥५४॥ तिष्ठन्नेव बहि
र्निजानुपदिशन्स्वकाः कलायोगगारूढस्वाविरूपचतत्करान्वितं करेणादापते वांछितान्॥ दृष्टुं तत्त
द्भर्स्मजीकविभवानग्रेचरीदर्शयन्नं मुल्यानिजयापितान्विनयते श्रीनक्तिधर्मात्मजः॥५५॥ इति
श्रीमत्सत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे विचित्रयोगकलाविकारनामाष्टमोऽ
ध्यायः॥८॥ कल्पतरुवाच॥ दिव्यासपूरिसत्कीर्तिरस्त्यं नारायणोन्नृप॥ तत्रमासद्वयं भक्तानुवासानंद
यन्भृशम्॥१॥ पिपलग्रामतस्तत्र नरसिंहो द्विजस्तथा॥ नारायणोऽक्षपप्रादुर्भावाजग्मतुः समम्
॥२॥ प्रार्थयामासतुस्तं च स्वग्रामागमनाय तौ॥ ताभ्यां प्रसन्नो वर्णीन्द्रः प्रतिज्ञातेऽलयेच्चतत्॥३॥ कृत्वा
ऽखं प्रबोधनामहोत्सवं सततोययौ॥ सहानुगोऽक्षयग्राममद्दावोजस्वतीतटे॥४॥ ततः सपिप्पलग्रा

॥स·नी·द्वि मंत्रांश्चिन्नैवद्दिनेययौ॥ उभयोर्गमयोस्तत्रषण्मासानवसत्प्रभुः॥ ५॥ नारायणोरामजित्त्वगोविंद ग्रं०८॥
॥२७॥ श्चकुमारजित्॥ नृसिंहः परमानंदः कल्याणश्चकुजोरघुः॥ ६॥ स्नातात्रास्तमसेवेतविप्राश्चान्येविभ
क्तितः॥ जीवाचजाह्निनीमिश्री कमाजादुमुताः स्त्रियः॥ ७॥ प्रातुःसमाधौस्वानंदंसर्वेतेरूपयाहरेः
कालकर्मयमत्रासविमोचनपरीयसः॥ ८॥ उरसंवत्सरकार्तिक्यांपौर्णमास्यांमहानभूत्॥ तुष्टुवुस्तं
जनाः सर्वेवासोभूषाधनादिभिः॥ ९॥ तदाशेनरसिंहस्तुकुलस्याग्रेधनोत्सवम्॥ महांतमकरोत्तेन
प्रातुःसर्वेपिविस्मयम्॥ १०॥ विष्णुयागंतेनचक्रेहरिशोजस्वतीतटे॥ देशांतरेभ्यआजग्मुर्जनास्तत्र
सहस्रशः॥ ११॥ विधाप्यविधिवत्कुंडंमंडपादिद्विजोत्तमैः॥ उपहारैर्महद्भिः श्रीविष्णुमार्च्ययदुत्त
मैः॥ १२॥ सहस्रशोद्विजास्तत्रतेनाहूताउपाययुः॥ वेदशास्त्रपुराणज्ञाः श्रौतस्मार्तक्रियाविदः॥ १३
गायत्रीवैष्णवीतत्रकांश्चिद्विप्रानजापयत्॥ द्वादशाक्षरमंत्रंचकांश्चिद्विष्णोःषडक्षरम्॥ १४॥ वि
ष्णोश्चाष्टाक्षरंमंत्रंकांश्चित्सूक्तंचवैष्णवम्॥ लक्ष्मीसूक्तंतथाकांश्चिद्ब्राह्मणान्सत्युजापयन्॥ १५॥
विष्णोर्नामसहस्रंचकांश्चिन्नारायणात्मकम्॥ धर्मकांश्चित्तुभगवद्गीतांसमपाठयत्॥ १६॥ श्रीम
द्भागवतंकांश्चित्पुराणंब्राह्मणान्हरिः॥ अपाठयच्चदशमस्कंधमेकंचकांश्चन॥ १७॥ श्रीवासुदेव ॥२७॥

माहात्म्यंविप्रान्कांश्चिदपाठयत्॥ तथोपनिषदौकांश्चित्कवचंश्रीनृसिंहकम्॥ १८॥ पारायणांस्तुवेद
स्यकैश्चिद्द्विजैरचीकरत्॥ स्वयंहोमाष्टाक्षरस्यचकारचजपंप्रभुः॥ १९॥ होमंपूर्णाहुतिंकृत्वाबहू
न्विप्रानभोजयत्॥ तेभ्योवासांसिभूषाश्चददौवित्तंयथेप्सितम्॥ २०॥ विप्रेभ्यः शतशःकन्यादाना
र्थद्रविणंमहत्॥ ददौसद्विजवाजानामुपनीतैश्चभूरिशः॥ २१॥ पयस्विनीश्चशतशोधेनूःप्राद
द्यथाविधि॥ रथाश्वादीनियानानिददौचस्वर्णमुद्रिकाः॥ २२॥ ततःसौराष्ट्रदेशीयानभ्यागतांश्चागंतुका
न्द्विजान्॥ षण्मासानभोजयामासषट्चेष्टसहस्रशः॥ २३॥ अतिमर्त्यंचरित्रोऽसौवैभवमानंदयन्नि
जान्॥ ततोमेघपुरंप्रायात्कृत्वादशशरोत्सवम्॥ २४॥ अनुयातोनिजान्भक्तान्नृसिंहादीन्विचार्यसः॥
सन्मुखागतभक्तौघैः स्तूयमानस्तदागमत्॥ २५॥ तंनेत्ररघुनाथाद्याविप्राभक्त्यासिषेविरे॥ तत्रचाम
रसिंहाख्योभाटोनित्यमुपैःसह॥ २६॥ स्वर्णकारारामजित्तुजीवोनारायणादयः॥ जादकीचत्रिभुव
नाद्याःसेवंतेस्मवतंस्त्रियः॥ २७॥ नारायणस्वरूपयानानायोगविधौ॥ स्वातंत्र्यंजेभिरेचैतेभक्तास्तत्र
जनाधिप॥ २८॥ तत्रैवरवजित्संज्ञंमृणडुःस्वार्द्रंतंद्विजम्॥ दृष्ट्वाभूरिधनेनतस्मैरत्वाऽमोचयदापदः॥
२९॥ प्रतापंजयथयन्नेवंस्वस्यमासदयंनृप॥ तत्रोषित्वाततःप्रायान्मणिमत्पुरंहरिः॥ ३०॥ मयरा

॥स.जी.टि
॥२९॥

माल्यवित्रस्वगृहेस्वावासमाचरत ॥ भ्रात्राग्रजोविंदरामेणसाकंसततमसेवत ॥ ३१ ॥ वैराग्यश्चतत्त्वांबुनी ॥श्रा०७॥
वस्त्रामकृञाणलक्ष्मणाः ॥ जसुमुख्यामुदातस्यपरिचर्यामकुर्वत ॥ ३२ ॥ मिष्टारत्नवतीमुख्यायोषि
तस्त्वातिभावतः ॥ परिचर्यांभगवतोभक्ताविदधिरेऽन्वहम् ॥ ३३ ॥ नारायणमुनिस्तत्रजन्माष्टम्यांम
होत्सवम् ॥ चकारानंदयन्भक्तान्पूर्ववल्लयपन्नयत्रतः ॥ ३४ ॥ दिग्गंतरेभ्यस्तत्राऽऽयतगृहिणःसहि
योजनाः ॥ भक्तास्त्रसागिनःसर्वेहरिक्षणसमुत्सुकाः ॥ ३५ ॥ उपवासंजागरंचनिशीथेरूपपूजनम् ॥
साकंभक्तैर्हरिश्चक्रेविधिनाचसदर्चनम् ॥ ३६ ॥ विप्रसंतर्पणंकृत्वापरेद्युःकृतपारणाः ॥ अपराह्णे
सभांचक्रेमहतींनृपतेसन् ॥ ३७ ॥ आकारितास्तत्रतेनभक्ताःसर्वत्रपेसलाः ॥ यथोचितंतनिषेदुश्चयोषि
तोपेकलोऽखिलाः ॥ ३८ ॥ ततःसभायांनिषसाददिव्येसिंहासनेसर्वजनैकसेव्यः ॥ संपूज्यमानोनिज
भक्तसंघैर्नारायणःस्मेरमुखःसतत्र ॥ ३९ ॥ तेपूजितंरुचिरचंदनपुष्पवस्त्रैर्भक्तव्रजैःसदसितत्र
विराजमानम् ॥ देशांतरागतजनैर्मुनिभिश्चनुत्वंनत्वाऽब्रवीत्सविनयंमयरामविप्रः ॥ ४० ॥ इतिश्री
सत्संगिजीवनेनारायणचरित्रेधर्मशास्त्रेप्रकरणेविष्णुयागविधानमणिनद्युरागमननामा
नवमोऽध्यायः ॥ ९ ॥ सुव्रतउवाच ॥ ततःसभायांनिषसाददिव्येसिंहासनेसर्वजनैकसेव्यः ॥ संपूज्यमा ॥२९॥

नोनिजभक्तसंघैर्नारायणःस्मेरमुखःसतत्र ॥ १ ॥ तंपूजितंरुचिरचंदनपुष्पवस्त्रैर्भक्तव्रजैःसदसि
तत्रविराजमानम् ॥ देशांतरागतजनैर्मुनिभिश्चनुत्वंनत्वाऽब्रवीत्सविनयंमयरामविप्रः ॥ २ ॥ मय
रामउवाच ॥ कारुण्यपूर्णमखिलाश्रितजीवजातत्तापत्रयोपशमनप्रथितप्रतापम् ॥ आनंदमू
र्तिममलंस्वकाश्रितंनारायणंगुरुवरंशरणमाप्यहंत्वाम् ॥ ३ ॥ हरेसर्वज्ञभगवन्भक्तकल्प
महीरुह ॥ हितायसर्वभूतानांधृतमानुषविग्रह ॥ ४ ॥ त्वद्भक्तिरेवसर्वेषांजीवानांभुविसर्वथाश्रेयस्क
रीतिजानेऽहंप्रसादात्तवनिश्चितम् ॥ ५ ॥ सायेनपुंसिमासाद्यभवेदिष्टफलप्रदा ॥ तमुपायंमहाराजव
क्तुमर्हसिमेऽञ्जसा ॥ ६ ॥ श्रीनारायणमुनिरुवाच ॥ अमीभूतानचेद्भक्तिर्नवेद्धिद्येनभूयसा ॥ तर्हीश्रफ
लदानृणांसाधनमानमवेद्भुतम् ॥ ७ ॥ अस्तितस्मात्मंतरायोमहान्सर्गोत्थधार्मिकः ॥ सर्गेणधार्मिकेण
चसजेतलब्धःप्रयत्नतः ॥ ८ ॥ आसुरीसंपदाऽऽद्योवैसर्गोदोषात्मकोमतः ॥ दैवीसंपदितिप्रोक्तोहिता
यस्तुगुणात्मकः ॥ ९ ॥ नयेनाऽधर्मसर्गस्यभक्तिःपुष्टिस्तदाभवेत् ॥ धर्मसर्गाश्रयादेवमतुस्याद्द्विजस
त्तम ॥ १० ॥ सुव्रतउवाच ॥ इतितद्वाक्यममृतंनिपीयसपुनर्द्विजः ॥ पप्रच्छस्वामिनंप्रीतःसर्वसंशयना
शनम् ॥ ११ ॥ मयरामउवाच ॥ संजधर्मभक्तिसंज्ञाश्चसर्गयोरेतयोर्द्वयोः ॥ पृथक्पृथग्मुनिपतेवदमेत

स.नी.टि. दनुजस्य वै ॥ १२ ॥ स्कन्द उवाच ॥ धर्मस्त्रियेणविप्रेण पृष्टस्त्वेवं स संदिग्धवाच भगवान्नारायणस्तं कसंघमनोहराम् अ० १० ॥
॥ १९ ॥ १३ ॥ श्रीनारायणमुनिरुवाच ॥ यज्ञे ब्रह्मसुरा ब्रह्मा विष्णोर्नाभिसरोरुहात् ॥ वैराजधारणां कृत्वा ससर्गा-
योपचक्रमे ॥ १४ ॥ देवान्दैत्यान्नरान्नागान्सर्वांश्च पशुपक्षिणः ॥ स्थावराञ्जंगमान्धाता ससर्ज स यथा-
पुरा ॥ १५ ॥ पृष्टदेशादधर्मोऽभूत्तस्याविद्यात्मको विधेः ॥ सत्त्ववर्गेण सकलाजो कान्यापाः च सद्गती ॥ १६ ॥
प्रजाभ्यो दुःखदश्चाऽभूज्जन्ममृत्युप्रदस्तथा ॥ संसृतिश्रामकष्टाप्तो निरयप्रापको नृणाम् ॥ १७ ॥ मृषाः
मृषा च निंदितेर्ष्याच हिंसाऽज्ञानममतादयः ॥ शाकयस्तस्य कथिता दुर्नयस्याऽपपौरुषैः ॥ १८ ॥ दंभो लोभो
मत्सरश्च कामः क्रोधो रसो मदः ॥ दर्पो मोहश्च पारुष्यं स्नेहो मानोऽनृतं कलिः ॥ १९ ॥ द्रोहो हैऽशौचमविश्वा-
सश्चौर्यपानं च निर्ऋतिः ॥ द्यूतं गर्वश्च नास्तिक्यं पैशुन्यं कपटं स्पृहा ॥ २० ॥ रागो द्वेषो भयं दुःखमज्ञानं अम-
नंतथा दुरुक्तिर्निकृतिर्हिंसा पापं मृत्युश्च पातनाः ॥ २१ ॥ एत धर्मस्यान्वयाख्याः साधान्मेनोपवर्णितः
असुराणामतिप्रेष्ठोऽवर्जनीयः सदा सताम् ॥ २२ ॥ अथैकैकोऽप्यधर्मेण समवीर्यपराक्रमः ॥ अस्ती-
सेकमपि क्वापि नस्वीकुर्याद्विपश्चितः ॥ २३ ॥ अनेनाऽधर्मवर्गेण पीड्यमानाखिलाः प्रजाः ॥ वीक्ष्यतासां हि-
तं ब्रह्मा चिंतयामास चेतसा ॥ २४ ॥ कथं प्रजानां सर्वासां स्यादेवं स्वाभिवांछितम् ॥ प्रतिचिंतयतस्तस्य प्र ॥ १९ ॥

ते ॥ १५ ॥ उर्वश्याः पुत्रतां प्राप्य मित्रावरुणवीर्यतः ॥ विख्यातोऽभूद्वसिष्ठस्तु वेधसः सूनुरितिध्रुवम् ॥ १६ ॥
रस्यं लोभवशादेव वसिष्ठोऽपि महामुनिः ॥ सूर्यवंशान्नृपाचार्यः संप्रपेदे पराभवम् ॥ १७ ॥ लोभेन हैहयस्या-
प्य महायोगकलानिधेः ॥ अपि श्रीदत्तशिष्यस्य कथयामि पराभवम् ॥ १८ ॥ अर्जुनाख्योऽभवद्राजा कृत-
वीर्यात्मजो महान् ॥ चंद्रवंशे समुत्पन्नो महाबलपराक्रमः ॥ १९ ॥ स तु नारायणस्यांशाद्दत्तात्रेयं महामुनि-
मुनिम् ॥ आराध्य बाहुसाहस्रं पुधिजे भेनितेप्सितम् ॥ २० ॥ योगैश्वर्यं च संप्राप्य तस्य सादेन सोऽर्जुनः ॥ अ-
व्याहतबलौजाः श्रीः पृथिवीं बुभुजेऽखिलाम् ॥ २१ ॥ स एकदा तु मृगयां विचरन्गहने वने ॥ यदृच्छयाऽऽश्र-
मं प्रापज्जमदग्नेस्तपोनिधेः ॥ २२ ॥ स तस्मै नरदेवाय मुनिरर्हणमाहरत् ॥ ससैन्यामास्य बाहाय काम-
धेनोः प्रसादतः ॥ २३ ॥ तदाऽभूद्विस्मितो राजा वीक्ष्य तन्मुनिवैभवम् ॥ आत्मैश्वर्यातिशायितमर्हेन्वाऽशु-
तेच्छक्चित ॥ २४ ॥ ततः कामदुघामेव तद्धेतुमवगत्य सः ॥ बलात्तां स्वपुरं निन्ये क्रंदंतीं च सवत्सकाम् ॥ २५
अथैतं तु गतो विद्या रामस्तावदुपागतः ॥ श्रुत्वार्जुनस्य दौरात्म्यं तु क्रोधाहिरिवारतः ॥ २६ ॥ घोरमादाय प-
रशुं ततो माहिष्मतीं पुरीम् ॥ गत्वा स तेन युयुधे कृत्वा तं रवदुर्जयैः ॥ २७ ॥ अक्षौहिणीभिः सहितं ससप्तद-
शाभिर्नृपम् ॥ तेन निहत्य निजां धेनुं गृहीत्वाऽऽश्रममाययौ ॥ २८ ॥ तस्य तत्कर्म विज्ञाय जमदग्निः क्षमानिधिः

॥स·नी·टि॥ पारद्युम्नत्वयानैतत्कृतं ब्रह्मकुलोचितम् ॥२९॥ वयं हि ब्राह्मणास्तात क्षमया पूज्यतां गताः ॥ पारमेष्ठ्यं अ०११॥
॥२२॥ पदं प्राप क्षमयैवांबुजासनः ॥३०॥ क्षमयैव हरिः साक्षात्प्रभुत्वं प्रतिनाम्यया ॥ पापमेव त्वया पुत्र कृत
मेतन्न संशयः ॥३१॥ राज्ञो मूर्द्धाभिषिक्तस्य वधो ब्रह्मवधाद्गुरुः ॥ तन्निष्कृतं कुरु त्वं तः शीघ्रं त्वं तीर्थयात्र
या ॥३२॥ इति वाक्यं पितुः श्रुत्वा तीर्थयात्रां सवत्सरम् ॥ कृत्वा यथोक्तविधिना पुनः स्वाश्रममाययौ ॥३३॥ ए
कदाऽऽश्रमतो रामे सभ्रातरि वनं गते ॥ अर्जुनस्य सुताः प्राप वैरवृद्धिजुषस्तदाश्रमम् ॥३४॥ क्रंदंतीमप्य
नादृत्य रेणुकां तेऽसिदारुणाः ॥ छित्वा मुनेः शिरस्तूर्णं गृहीत्वा स्वपुरं ययुः ॥३५॥ मातुराक्रंदमाकर्ण्य रा
मः शीघ्रमुपेयिवान् ॥ जन्मतस्तत्र दौरात्म्यं दृष्ट्वा तीव्रक्रोधमापसः ॥३६॥ ततो माहिष्मतीं गत्वा हत्वा तानर्जु
नात्मजान् ॥ तदक्तेन नदीं घोरां चक्रेऽदृष्टचरीं विभुः ॥३७॥ पितुः शिरः समानीय तमनीवयदीश्वरः ॥ स
रामः स्थापयामास तं च सप्तर्षिमंडले ॥३८॥ एकविंशतिकृत्वोऽथ कृत्वांतर्दैवभीषणः ॥ निःक्षत्रियां महीं च
क्रे परशुहस्तः परिभ्रमन् ॥३९॥ यस्यं लोभेन नृपतिः सहपुत्रैर्विनाशसः ॥ सकलक्षत्रसंहारे हेतुश्चासीद्धि
नष्टधीः ॥४०॥ एवं मन्योपि बहवो मुक्ताः सिद्धा महर्षयः ॥ राजानश्चापि लोभेन विनष्टिं महतीं ययुः ॥४१॥ लो
भं रुद्धेन महतो क्रमतेमयेत्युक्तावसिष्ठकुलवीर्यजयोर्द्धशांते ॥ वत्सोऽप्यकामपरत्वं चेतयाऽऽक्रुद्धदेस्तां ॥२२॥

काशीऽभून्महानृषिः ॥२५॥ अथ सत्त्वतनोस्तस्य हृदयादुद्धर्मोऽभवत् ॥ कृपाकृतिः स्वयं धर्मो यत्र नारा
याताः किं प्रयोजनमत्र वः ॥ उपाध्येदैवतं कोवश्शास्त्रं किं चाऽस्ति वप्रियम् ॥ ३७ ॥ एतच्छ्रुत्वा हरे
र्वाक्यं कौचकौ निजचेतसि ॥ अचिंतयत्तृष्णां तत्र लज्जापोऽस्कमानसः ॥ ३८ ॥ एनमेवैष्णवं प्राज्ञ
रहोमंदधियो जनाः ॥ पोतिप्रसिद्धं लोके पुमामप्येषन वेत्ति वै ॥ ३९ ॥ बाला अपि जना लोके विदु
र्मामतिभास्करम् ॥ तमप्येष न जानातिनत्वाऽसौ यौनवानपि ॥ ४० ॥ अहो वैतं विजेष्यामि राततमीज्ञा
नयंमम ॥ चर्मंतु शप्रसादेन दृढ़कौजागमेन च ॥ ४१ ॥ इति संचिंत्य शिष्यान्स्वान्कृंसद्धैरयहृज्ञा

स्वनामादित्तनस्तेच भेतुर्हैशाक्तगनस्तति म्॥४२॥कौलकशिष्या ऊचुः॥महादीक्षामहापानगु 
रवः कुलयोगिनः॥एते संति महासिद्धा ब्रह्मस्थिदा यतिवर्णिनः॥४३॥नैते केनापि भाषंते दिवा
सद्भिर्मौनिनः॥भिक्षौ साक्षान्महाशक्त्या वदंति रमयंति ताम्॥४४॥वयं च सिद्धपुरुषाः कौलाग
मविशारदाः॥अस्माकं च न रैणगणां गुरुराडेष कौलकः॥४५॥उद्दामा पैकतरणेः सहस्रनगीनः
॥प्रतिपाम विद्यागुल्पो गुरोः शिष्यस्तु तुःपिवः॥४६॥प्रमादादः स्व च हवोराजानो ब्रह्मसंदर्शनम्
प्रातुः सद्योमहानंदं सर्वत्र समदर्शिताम्॥४७॥नैत तु अः कोपि लोके मिदं दुर्लहं निश्चितम्॥मका
रपंचकाचार्यैः कौलविकुलपावनः॥४८॥एनं विदंति सर्वेपि भुविभास्करगे स्थितम्॥स्यात तत्वमी
श्वरत्वेन नवैसीलद्भुतं महत्॥४९॥उपास्महे वयं साक्षाद्देवीं त्रिपुरसुंदरीम्॥कौलागमः प्रमाणं
नः सर्वशास्त्रशिरोमणिः॥५०॥योगी चेन्नैव भोगी स्याद्भोगी चेन्नैव योगवित्॥योगभोगात्मकं कौ
लं तस्मात्सर्वाधिकं मतम्॥५१॥शैवं वैष्णवं बौद्धादि दर्शनान्यपि न क्वचित्॥भजेते मानवा निःसंशयं थ
या सफला निहि॥५२॥महापापवशान्नृणां तेषु बौद्धाभिजायते॥तेषां हि सम्फतिनास्ति विना कौ
लनिषेवणम्॥५३॥सुव्रत उवाच॥इति तेषां वचः श्रुत्वा भगवांस्तन्मतांतकः॥पप्रच्छ तेषां सिद्धांतं 

भिक्षाकरि च मुक्तिवित्॥५४॥श्रीनारायणमुनिरुवाच॥अपूर्वं पंथं श्रुत्वा वाणीं भवतां भोस्तु तुःपिवाः
॥सिद्धांतं ब्रूत युष्माकं सप्रमाणं च तत्फलम्॥५५॥कौलकशिष्या ऊचुः॥अस्माभिर्लोकगुरवः
शाक्तहृद्विविदितः पुरा॥विज्ञातोऽस्य गृहं तु सेवैर्मिजाकरितिनिश्चितम्॥५६॥त्वया यस्तु त्वा
लेत्तलुरहस्यं न संसदि॥वक्तव्यं कथमस्माभिर्वाच्यावाच्यविशारदैः॥५७॥उत्तरं यदि नो चेत्त
न तेर्जुनैहि त्वदाश्रिताः॥मूर्खानस्मान्विजानीयुर्गुरोश्चाप्यज्ञता भवेत्॥५८॥एते च सिद्धपुरुषा नि
र्विकल्पसमाधयः॥अज्ञा भवेयुः सर्वज्ञा महापानगुरूत्तमाः॥५९॥अतो यथा वास्ति सिद्धांतं ब्रूमस्ते
कौलसंमतम्॥सदा स्वानामपि न वेत्तत्र स्फुटालवेवपत्॥६०॥शास्त्रवाक्यविना नैव शास्त्रज्ञस्य
न वेत्तव निश्चयीः तोऽत्र कथ्यंते कौलशास्त्राः शांकरोत्कयः॥६१॥इति श्रीसत्संगिजीवने नारायणच
रित्रे धर्मशास्त्रे द्वितीयप्रकरणे जयतलपुरे स्थितेऽशाक्तमतसंखडने पूर्वपक्षत्वेन कौलमतनिरूपण
नामा पंचचत्वारिंशोऽध्यायः॥४५॥श्रीनारायणमुनिरुवाच॥यूयं हि महापापा लोके धूर्ताः स्थपतिताध
माः॥अप्रमाणमसच्छास्त्रं युष्माकं मुख्यमस्ति यत्॥१॥केनचिन्महापैनैव पापग्रंथीकृते दिवः॥
सच्छास्त्रं सम्यग्मोसेवनतोऽत्र प्राप्यन्ते वहि॥२॥ब्रह्मसज्ञानं सुरापानाद्भवेत्तर्हि कुतः श्रमः॥पूर्वमेह

॥स॰ गी॰ द्वि॰ त्रिर्मुनिभिस्तपसः क्रियतेशु या ॥३॥ मद्यपानां कुलान्येव पञ्चचारीनि संतति च ॥ प्राप्नुवंति कथं ने ऽ॰ ४६॥
॥१००॥ व मुक्तिं तानि पञ्जपि याः ॥४॥ आमिताः केन पूर्वं वै कथं प्राप्ता अस्पृ दुर्धियम् ॥ एकवर्गं जगत्कर्तुं
किं वा सृष्टाः स्वयंभुवा ॥५॥ आर्षग्रंथस्थिता श्लोकान्मद्यपाननिषेधकान् ॥ सप्रमाणान्मसिद्धां
स्तास्तै ब्रूय यथ्रुवम् ॥६॥ गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा ॥ यथैवैका तथा सर्वा न पा
तव्या द्विजोत्तमैः ॥७॥ स्वायंभुवो मनुरिति सुरापानं निषेधति वचनं यात्तवन्त्रूस्मस्मृपतां च तद्
र्यकम् ॥८॥ अज्ञानात्तु सुरां पीत्वा रेतो विण्मूत्रमेव च ॥ पुनः संस्कारमर्हंति त्रयो वर्णा द्विजातयः ॥
९॥ पानसंज्ञास्तु माधूकं खार्जूरं तालजमैक्षवम् ॥ मधूत्थं सैरमारिष्टं मैरेयं नालिकेरजम् ॥१०॥ स
मानानि विजानीयान्मद्यान्येकादशैव तु ॥ द्वादशं तु सुरा मद्यं सर्वेषामधमं स्मृतम् ॥११॥ एवं पुल
स्त्योऽपि मुनिर्मद्यपानं निषेधति ॥ तत्राथ धर्मपदे पाणे पुष्पाभिः कृतं तत्तमः ॥१२॥ ऊर्ध्वाम्नायः प्रमा
णं चेन्न वर्तां तर्हि मद्यपाः ॥ श्रुतीः प्रमाणयत्र किंत्स्वी शर्यामद्यु आत्मनः ॥१३॥ असंदेवतातः शास्त्र
यो श्राकं धूर्तकल्पितम् ॥ सर्वेशास्त्रविरुद्धत्वादप्रमाणं मतं हि वः ॥१४॥ अस्त्रू वर्णं तरकथा न व
द्भिः ब्राह्मणैः कथं ॥ निःशंकं पीयते मद्यं वेदशास्त्रविगर्हितम् ॥१५॥ स्वपचादिसुखोच्छिष्टं पीत्वा ॥१००॥

च पतिता धमाः ॥ दृष्टय थ्रेतु तौ पूर्वं ब्रह्मसत्त्वेनाविप्रताम् ॥१६॥ ब्रूत पूर्वं च विप्रस्य सुरापान॰
विधायकम् ॥ एकमेवापि वचनमार्षग्रंथे यदि वेद्यदि ॥१७॥ अहं त्वेतन्निषेधस्य वाक्यान्यद्य स
हस्रशः ॥ ब्रूयामार्षाणि सर्वाणि सप्रमाणानि मद्यपाः ॥१८॥ यक्षरक्षः पिशाचान्नं मद्यं मांसं सं सु
रासवम् ॥ तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः ॥१९॥ इत्यादीनि बहून्येव स्मृतिवाक्यानि सं
ति वै ॥ याणितं च सुरापानं महापातकपंचके ॥२०॥ सुरां वा घृतगोमूत्रपयसामग्निसन्निभम् ॥ सु
रापोऽग्नितप्तं पीत्वा मरणाच्छुद्धिमृच्छति ॥२१॥ अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव च ॥ पुनः
संस्कारमर्हंति त्रयो वर्णा द्विजातयः ॥२२॥ सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत् ॥ इत्याद्यज्ञा
नपानेऽपि स्मर्यते तस्य निष्कृतम् ॥२३॥ पुनः पुनः प्रपिबतां युष्माकं बुद्धिपूर्वकम् ॥ न विष्णुतिग
तिः कावा जनानामात्मतामधः ॥२४॥ अगम्याः परयोषा हि तत्संगं ये तु कुर्वते ॥ तेषां च वेदनां
तीव्रां वक्ष्मि नागवतोदिताम् ॥२५॥ यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषिदभिगच्छति
तावमुत्र कशया ताडयंतस्तिग्मया सूर्म्या लोहमय्या पुरुषमालिंगयंति स्त्रियं च पुरुषरूपया सू
र्म्या ॥२६॥ कृष्ण उवाच ॥ इति वाचं भगवता प्रोक्तां मानुत्यते द्विजा ॥ अथाज्ञात्पुत्तरं दातुं त्वं पी॰

मांसभक्ष्यमद्यपः ॥ २७ ॥ हरिशाम्भिन्नमर्मा ग्यगुरुस्तेषां रुषान्वितः ॥ तमुवाच महाकालीपानपा-
त्रकरो ऽस्मरन् ॥ २८ ॥ किंच कुरुवाच ॥ अस्मन्मते ऽपि दोषो ऽस्ति सुरापाने तथा सुतो देवप्रसादमद्यादेः
शास्त्रे नैकान्ति दूषणम् ॥ २९ ॥ यज्ञेषु ब्राह्मणैर्मद्यं मांसं देवनिवेदितम् ॥ यथेष्टं भक्ष्यमित्याह वेदस्तत्रा-
स्ति किल्बिषम् ॥ ३० ॥ या वेदविहिता हिंसा न सा हिंसेति कथ्यते ॥ रहस्यमित्यायुज्ञात्वा दृष्यग्नु-
नः कथ्यम् ॥ ३१ ॥ भारते च पुराणे ऽपि सुबहवो ब्राह्मणा अपि ॥ मद्यपानां सभक्षाश्च श्रूयन्ते स्वेष्टयोषितः
॥ ३२ ॥ मार्कण्डेयपुराणे च समस्तानां प्रशंसनम् ॥ यथा चन्मद्यमांसादेः कृतमस्ति नवेत्तिनत्तु ॥ ३३ ॥
कुव्रतउवाच ॥ अप्रमाणं निरंग्रंथांस्तान्नास्तिकाग्र्यवेदिकम् ॥ जुगेनाखिलमार्गे तं ब्रुवंतं दूरितु-
श्चिवान् ॥ ३४ ॥ श्रीनारायणमुनिरुवाच ॥ देवा हिंसालिकाः प्रोक्ता राजसा दैत्यदानवाः ॥ तामसा रा-
क्षसाद्याश्च पुराणे ऽस्मागमेषु च ॥ ३५ ॥ पयः सर्पिश्चामृतान्नमन्नं देवप्रियं मतम् ॥ दैत्यानां राक्षसा-
दीनां सुरामांसासृगन्नं प्रियम् ॥ ३६ ॥ आदिराजेन पृथुना दोहिता अत एव हि ॥ स्वस्वान्नेष्टकृतः सर्वे पृथि-
वी धेनुं रूपिणीम् ॥ ३७ ॥ कृत्वा वत्सं स्फरगणा इन्द्रं सोमं महर्षयः ॥ हिरण्मयेन पात्रेण वीर्यमोजो वजं
पयः ॥ ३८ ॥ दैतेया दानवा वत्सं प्रल्हादमसुरर्षभम् ॥ विधायायस्तु हस्त्रसीरमयः पात्रे सुरासवम् ॥ ॥ १०१ ॥

३९ ॥ यक्षरक्षांसि भूतानि पिशाचाः पितृजोनागताः भूतेशवत्सा दुदुहुः कपाले क्षतजासवम् ॥ ४० ॥ इत्थं
श्रीमद्भागवते ऽपि पुराणे प्रतिपादितम् ॥ नैवेद्यार्हं न देवानां मद्यं मांसं ततो मतम् ॥ ४१ ॥ राजसानां ता-
मसानां मद्यमांसाशने रुचिः ॥ स्वाभाविकी वर्त्तते ऽतो विधिरप्येषां न वर्त्तते ॥ ४२ ॥ यत एव तनोर्हिं-
सां नित्यहिंसानि वृत्तये ॥ वेदो ब्रूते न तत्र स्यादहिंसा वेदस्य कर्हिचित् ॥ ४३ ॥ भारते च पुराणे ऽपि प्रोक्त-
मादौ प्ररोचनम् ॥ अहिंसा परमो धर्म इत्येव स्थापितं ततः ॥ ४४ ॥ मार्कण्डेयपुराणे ऽपि सुरासांनं तुःपि-
व ॥ मद्यमांसाशने कार्ये द्विजेनेति न विद्यते ॥ ४५ ॥ देव्याः पूजा सुरामांसैरहस्ये भवतीति चेत् ॥ मार्क-
ण्डेयपुराणे तद्रहस्ये नैव विद्यते ॥ ४६ ॥ सुरामांसादिपूजेयं विप्रवर्ज्या मयोदिता ॥ रसर्वेन निषेधो ऽ-
स्ति रहस्ये ऽपि द्विजन्मनः ॥ ४७ ॥ अज्ञात्वा शास्त्रतात्पर्यं ये त्वारज्ञाः पापकर्मिणः ॥ तेऽघैः सह व्रजन्ते ते
महतो निरयान् खलु ॥ ४८ ॥ सुरापाने महापापं द्विजानामिति भार्गव ॥ उशना स्थापयामास मर्यादां
तद्वचः शृणु ॥ ४९ ॥ यो ब्राह्मणो ऽद्य प्रभृतीह कश्चिन्मोहात्सुरां पास्यति मंदबुद्धिः ॥ अपेतधर्मा ब्रह्महा चैव
स स्यादस्मिंल्लोके गर्हितः स्यात्परे च ॥ ५० ॥ इति शुक्रकृता लोके मर्यादा विद्यते किल ॥ महापापं क-
थं न स्यात्तामुल्लंघ्य पततस्तव ॥ ५१ ॥ गोचर्यासमविना ऽपि मनुष्याणां पुरा मुनिः ॥ अदात्तत्किं न श्रुतं के तु
निषेधं च तत्र शृणु ॥ ५२ ॥ सुस्त्री रंसापतिं नार्या अद्य प्रभृति पातकम् ॥ भ्रूणहत्यासमं घोरं भविष्यत्यसु-

॥स॰जी॰टी॰ ॥१०२॥

त्वा च हम् ॥५३॥ भार्यां तथा शुद्धरतः कौमारब्रह्मचारिणीम् ॥ पतिव्रतामेतदेवमविताथान कंतु (अ॰४६॥)
चि ॥५४॥ मांसे तु सर्वथा नैव कस्यचिज्जंतुनोपिया ॥ भक्षणेर्हमनुष्याणामिति धर्मपथः किल ॥५५
॥ यज्ञशेषस्य मांसस्य भक्षणेन द्विजन्मनः ॥ महान्नदोषो स्ति निर्दोषं मांसं नास्ति च कर्हिचित् ॥५६
॥ यज्ञशेषादिमांसस्य भक्षणेन्यत एव हि ॥ निषेधो भारते स्तीति तदा कर्मपिते ब्रुवे ॥५७॥ यत्तु प्रा
संस्कृतं मांसं निवृत्तो मांसभक्षणात् ॥ न भक्षयेद् वृथा मांसं पृष्ठमांसं च वर्जयेत् ॥५८॥ एकतः सर्व
मांसानि मत्स्यमांसानि चैकतः ॥ भवंति पापरूपाणि विप्रस्तानि न भक्षयेत् ॥५९॥ स्वयमेव हि सिद्धांतो
वेदशास्त्रप्रमापितः ॥ असदेव मतं तस्मात्तत्र मांसाशिनो ऽखिलं ॥६०॥ प्राणिमात्रवधं मत्वा राकृत्वि
त्राण तेन पजलं पल प्रियाः ॥ जीवघातस्य हेतुश्चि पूर्वकं नास्ति दोषः इति वो मतं न सत् ॥६१॥ इति श्रीम
द्गंगाजीवनेनारायणाचरिते धर्मशास्त्रे द्वितीयप्रकरणे जयतत्पुरेषु द्वाक्रमलवंश नेमकार पंच
कोन्छिद्रनामा पञ्चचत्वारिंशोऽध्यायः ॥४५॥ कृष्णदत्त उवाच ॥ वाचे निज मतो चेद्ब्राह्मणस्त्वेतां सहरेन्य
॥ सर्वोपयामं त्र रुद्रवीर्योतर्या कुलीनब्रवीत ॥१॥ कीनकृत उवाच ॥ पद्धिवेदस्य तात्पर्यं हिंसादौ नैव
विद्यते ॥ हिंसकाः कथं तर्हि कृतादौ वर्षि भूमिपैः ॥२॥ वेदशास्त्रपुराणानि तैरधीतानि किं न वा
त्व मे वद पंडितोऽस्मि कः सर्वेभ्यो ऽस्माणप्रदः ॥३॥ अन्नं नराणाम चराद्ध पदः पादवारिणाम ॥ अहस्ताह ॥१०२॥

स्तयुक्तानां द्विपदां च चतुष्पदः ॥४॥ इति भागवतश्लोकः ॥ प्रमाणं मांसभक्षणे ॥ परं परागत श्चागतिज्ञ
श्चाचारेणापि हि द्विजाः ॥५॥ उद्धानः श्वेतकेतुर्मां मर्यादा पापवर्त्तिता ॥ सात्विदानीं तन्नीज्ञेयानलव नादि
मतं हितत् ॥६॥ मतमाधुनिकं सुज्ञानैव गरहं तिपंडिताः ॥ ते तु प्राचीनमध्यानं श्रयंते सूक्ष्मदर्शिनः
॥७॥ कृष्णदत्त उवाच ॥ सत्यं पंडिताय मान स्पतस्पेध्यं चाचमीस्व रः ॥ सज्जात्मुत्समते तस्य मर्दयन्ना हय
हवः ॥८॥ श्रीनारायणमुनिरुवाच ॥ हिंस्रकर्मपरान्नाः ह्रूरूप ये किंतु वैदिकः ॥ एवमेवार्गस्तिसिद्धां
तः स एव कथितो मया ॥९॥ भारते मोक्षधर्मेषु भीष्मो राजा युधिष्ठिरम् ॥ निःसंशयं तमेवाह तद्
चां क्षिनिशामय ॥१०॥ अव्यवस्थितमर्यादैर्विमूढैर्नास्तिकैर्नरैः ॥ संशयात्मभिरव्यक्तैर्हिंसा समनु
वर्णिता ॥११॥ सर्वकर्मस्वहिंसां हि धर्मात्मा मनुरब्रवीत् ॥ कामकाराद्विहिंसंति बहिर्वेद्यां पशून्न
राः ॥१२॥ तस्मात्प्रमाणतः कार्यो धर्मः सूक्ष्मो विजानता ॥ अहिंसा सर्वभूतेभ्यो धर्मेभ्यो ज्यायसी मता
॥१३॥ यदि यज्ञांश्च वृक्षांश्च यूपांश्चोद्दिश्य मानवाः ॥ वृथा मांसानि खादंति नैष धर्मः प्रशस्यते ॥१४॥
सुरां मत्स्यान्मधु मांसमासवं कृसरौदनम् ॥ धूर्तैः प्रवर्तितं ह्येतन्नैतद्वेदेषु कल्पितम् ॥१५॥ मानान्मो
हाच्च लोभाच्च लौल्यमेतत्प्रकल्पितम् ॥ विष्णुमेवाभिजानंति सर्वयज्ञेषु ब्राह्मणाः ॥१६॥ पायसैः सुमनो
भिश्च तस्यापि यजनं स्मृतम् ॥ यज्ञियाश्चैव ये वृक्षा वेदेषु परिकल्पिताः ॥१७॥ यच्चापि किंचित्कर्तव्य

॥स॰जी॰टी॰ मत्स्यं चौ क्षैः सुसंस्कृतम् ॥ महत्स्वन्नैः शुद्धभावैः सर्वदेवार्हमेव तत् ॥ १८ ॥ इति भारतवाक्यानि कथितानि ॥अ॰ ४५॥
॥२०३॥ निवर्तुः पिब ॥ श्रीमद्भागवतस्यापि मितं तोऽस्य युगे वदि ॥ १९ ॥ आरुधूम्न धियो वेदं सकर्म कमतद्विद
ः ॥ अग्निमुग्धा धूममनोला स्वं जीकं न विदंतिते ॥ २० ॥ कामिनः कृपणा लुब्धाः पुष्पेषु फलबुद्धयः दे
धर्म्यं मांसमाकं दे यो ब्रवीदिति ॥ २१ ॥ आहर्त्ता चानुमंता च विशास्ता क्रयविक्रयी संस्कर्त्ता चोपभोक्ता च स्वाद
काः सर्व एव हि ॥ ४६ ॥ देहपुष्टिं विना कोऽपि गुणो नास्त्यामिषाशने देहस्तु दुःखरूपोऽस्ति रूतघ्नः क्षणभंगु
रः ४७ दोषास्तु बहवः संति नृणामामिषभक्षणे हिंसामाश्रित्य वर्त्तंते यतः पापानि सर्वदा ४८ ना
नाजन्मजरारोगमृत्युदुःखैर्निपादिताः संसारे परिवर्त्तंते ये जनाजीवहिंसकाः ४९ कुंभिपाके तु पच्यं
ते तैश्चैवानेकयोनिगाः नरकादिकदुःखं च गर्भवासे पिवा वशाः ५० सूक्ष्मकीटवधे पापमस्ति दोष
एवं महात्मनाम् संति प्राणाः प्रियतमाः सर्वेषामपि देहिनाम् ५१ आगच्छच्छकटाग्रवभीतो धाव
न् जिजीविषुः प्राणाः प्रेष्ठतमेत्याहव्यासं कीटो यतः पुरा ५२ अभयं सर्वभूतेभ्यो यो ददाति दयापरः

यान्ति स्ववधकाले तु जायते नप्रसन्नता ॥ ३२ ॥ अतएव वधे तेषां ब्रह्महत्याधिकः स्मृतः ॥ धर्मशास्त्रे
महान्दोषो विदेहानामपि ध्रुवम् ॥ ३३ ॥ तथा श्रमणानां सर्वेषां यज्ञभागभुजामपि ॥ वधकाले कश्चि
त्वा क्षेम हतीनाहि जायते ॥ ३४ ॥ जीवहिंसा या पमेव देवास्ते तद्विजानते ॥ प्रजायमानाः प्रलुब्धं व सं
तः कंदरादिषु ॥ ३५ ॥ तथा हिंसानराये च नेऽप्य श्वमसवधक्षणे ॥ यामेत्र स्वंतिनितरां प्रदवेतर
तस्ततः ॥ ३६ ॥ अतिक्रूरा अपि चैते तदानीं यां तिरं कृताम् ॥ अहिंसां च प्रशंसंति निंदंतो हिंसनं मुकुः
॥ ३७ ॥ भाविस्वमृत्युवार्त्तायाः श्रवणेऽपि महद्भयम् ॥ जायते हृदये पुंसां कंपश्च द्विपामपि ॥ ३८ ॥
तदा तु हन्यमानानां पापैर्मांसार्थिभिर्वजात् ॥ जीवानां रोगहीनानां कथं न स्यान्महद्भयम् ॥ ३९ ॥
ददृक्कर्मकृतां पुंसां क्रूराणां निर्दयात्मनाम् ॥ कुतः सौख्यं भवेदत्र परलोके च पापिनाम् ॥ ४० ॥ न हिंसां
सेत्तृणं काष्ठं उपलोष्टापि जायते ॥ हननादेव जंतूनां जायते श्वाघमस्ततः ॥ ४१ ॥ स्वाहास्वधामृ
तभुजो देवाः संस्मार्कवपि याः ॥ कथ्यादराक्षसा एवं तती मांसं विसर्जयेत ॥ ४२ ॥ अतु देजयतीजी
वान्न भयं क्वापि विद्यते ॥ भूतद्रोहेऽप्युक्ति हामुत्र भयं नैव निवर्त्तते ॥ ४३ ॥ परात्त्र स्वादकी नस्यात्तदा
घातकोऽभवेत ॥ न केता नापि विक्रेता मांसस्याः तीन भक्षयेत ॥ ४४ ॥ धनेन क्रयिको हंति स्वादकश्चोप
भोगतः ॥ घातको वधबंधाभ्यां मांसकं दे यो ब्रवीदिति ॥ ४५ ॥ आहर्त्ता चानुमंता च विशास्ता क्रयविक्रयी ॥ सं

॥ स.नी.द्वि॰ स्कर्त्ता चोपभोक्ता च स्वादकाः सर्व एव हि ॥४६॥ देहपुष्टिं विना कोपि गुणो नास्ति मिषाशने ॥ देहस्तु अ॰४३॥
॥१०४॥ दुःखरूपोस्ति कृतघ्नः खलाभं गुरुः ॥४७॥ दोषास्तु बहवः संति नृणां मांसभक्षणात् ॥ हिंसामांसि
वर्त्तते यतः पापानि सर्वशः ॥४८॥ नाना जन्म जरा रोग मृत्यु दुःखैर्भिपीडिताः ॥ संसारे परिवर्त्तंते ये
जनाजीवहिंसकाः ॥४९॥ कुंभिपाकेषु पच्यंते ते नैव नानेकयोनिगाः ॥ नरकाधिक दुःखे च गर्भवा
से पिचावशाः ॥५०॥ सूक्ष्मकीटवधे पापं स्ति दोष एव महान्नृणाम् ॥ संति प्राणाः प्रियतमाः सर्वेषां
मपि देहिनाम् ॥५१॥ आगच्छत्कराराः कंभीतो धावन् जिनीविषुः ॥ प्राणाः प्रेष्ठाम मेत्याह यासं कीटोपि
तः पुरा ॥५२॥ अभयं सर्वभूतेभ्यो यो ददाति दयापरः ॥ स एव निर्भयो लोके रहामुत्रापि संज्ञायम् ॥५३॥
तेनं आलमृगांघ्नंति निष्ठिराचा नराक्षसाः ॥ मुच्यते भयकालेषु मोक्षये दीनमानुरान् ॥५४॥ मृत्यु
काले महानकंपः स्यात् भूनामपि जायते ॥ तस्मान्न रोदयां कुर्याद् ध्यान्मनित या परे ॥५५॥ मांस भक्षयिता
मुत्र यस्य मांस मिहाद्म्यहम् ॥ एतन्मांसस्य मांसत्वं प्रवदंति मनीषिणः ॥५६॥ यज्ञार्थे पशवः सृष्टाः स्व
यं श्रुति ग्रासनात् ॥ यज्ञादन्यत्र ये नं घ्नंति पच्यंते राक्षसाः किल ॥५७॥ यज्ञेषु पश्वालंभोपि न साक्षाद् दृ
संमतः ॥ किंतु स्यात्किकृत्तीनां रागाद्धिंसानिवृत्तये ॥५८॥ आदौ कृतयुगे धर्मः सत्य दान तपो जपः ॥ आ
सीत्सत्वगुणोद्रेके सर्वेषां च हितावहः ॥५९॥ यज्ञस्तु त्रेतायां जज्ञे यत्र व्रीहिमयः पशुः ॥ तेनाजयष्टव्यं ॥१०४॥

न्नानः पुण्य जो काधि कांक्षिणः ॥६०॥ नमोनुविंदे राजर्षि काजेनायस मुच्छिते ॥ बुद्धिभेदः समभवन्नृ
णां देवानां चाधिकारिणाम् ॥६१॥ हिंसां जिगांसतो मेत्रा निंदो विश्वजिदो ह्यपः ॥ स्वायंभुवेंतरे
पूर्वे त्रेतायां समवर्त्तयत ॥६२॥ आदौ यज्ञोपि तेनैव वाजिमेधाभिधो महान् ॥ साक्षात्तस्माज्जन
पुतः स्वयं कृत्वा प्रवर्तितः ॥६३॥ कथयामि कथामेतां यज्ञसंबंधिनीं च ते ॥ प्रोक्ता वायुपुराणे या
मात्स्ये स्कांदे च भारते ॥६४॥ पुरा बभूव देवेंद्र आद्ये स्वायंभुवांतरे ॥ नाम्ना विश्वजिदित्युक्तो मंत्रविद्या
विशारदः ॥६५॥ त्रेतामुखे सोश्वमेधं यज्ञं प्रावर्त्तयत्प्रभुः ॥ स्वनियमैर्देवगणैः समृद्धसंभृतसाध
नः ॥६६॥ इंद्रियाणामधिष्ठातृन्देवान्देवास्तरंजिरे ॥ तत्राश्वमेधे वितते समाजग्मुर्महर्षयः ॥६७॥ नि
षेदुस्ते सभामध्ये तत्र देवैः समर्चिताः ॥ ददृशुर्यज्ञसंभारान् ऋषीन्देवान्समुत्सुकान् ॥६८॥ तत्राध्वरस्थ
वेदान्द्वीनां संज्ञापितः पशून् ॥ ततो विश्वजितं प्रोचुः सर्वे षाम्यएवतां चते ॥६९॥ अधर्मो धर्मघाताय
प्रारब्धः पशुभिस्त्वया ॥ नायं धर्मो ह्यधर्मोयं न हिंसा धर्म उच्यते ॥७०॥ आगमेन भवान्सर्वे प्रकरो
तु यदि छति ॥ विधिदृष्टेन यज्ञेन धर्मेणाव्ययसेतुना ॥७१॥ एवमुक्तः सुरेंद्रस्तैः ऋषिभिस्तत्त्वदर्शिभिः
नाग्रहत्ता द्वचनं तेषां मानमोहसमन्वितः ॥७२॥ ते तु विच्छावि वादेन तत्वयुक्ता महर्षयः ॥ संधायवा

रूपमिदं तेन च प्रभुः स्वचरं वसुम् ॥ ७३ ॥ महाप्रास्त कथं रे शत्रुत्वया यज्ञविधिर्नृप ॥ इतिरष्ट्रोजगादै 
॥१०५॥ वैसो ऽविचार्य बलाबलम् ॥ ७४ ॥ यष्टव्यं पशुभिर्मेध्यैरथौषधिफलैरपि ॥ हिंसाप्रधानो वै यज्ञवि
धिर्दृष्टो हि वैदिकः ॥ ७५ ॥ इत्युक्तमात्रेण स वसुः पपात धरणीतले ॥ ऊर्ध्वचार्यपि भूचारी स एवं
वचसा ऽभवत् ॥ ७६ ॥ धर्माणां संशयच्छेत्ता राजा वसुरधोगतः ॥ हिंसायाः कथनाद्युक्ते देवानां प
क्षपाततः ॥ ७७ ॥ ज्ञातुं शक्यो न वेदार्थो बुद्धिमद्भिरपि ध्रुवम् ॥ तस्माद् निश्चयाद्वक्तुं धर्मः शक्यो न
केनचित् ॥ ७८ ॥ अधिकारानुसारेण वेदो धर्मान्ब्रवीति यत् ॥ बहुधा रस्य धर्मस्य सूक्ष्मा दुरनुगा
गतिः ॥ ७९ ॥ एवं विवादः सुमहानासीद्यज्ञप्रवर्त्तने ॥ ऋषीणां देवतानां च पूर्वस्वायंभुवान्तरे ॥ ८० ॥ त
तस्तिऋषयो रुष्टास्त्यक्तं धर्मं बलेन तु ॥ अवसुं भाविनं दृष्ट्वा जग्मुः सर्वे यथागतम् ॥ ८१ ॥ गतेषु मुनिसं
घेषु देवा यज्ञमकुर्वत ॥ एवं रजस्तमोवृद्ध्या हिंसायज्ञे प्रवर्त्तते ॥ ८२ ॥ यादृशं च युगं यत्र द्विजा यादृग्गु
णास्तथा ॥ तादृशं हि तदा शास्त्रं प्राधान्येन प्रवर्त्तते ॥ ८३ ॥ तस्मात्त्वहिंसा कार्येति यदुक्तं मुनिभिर्वचः
प्रमाणं वा कुतस्तद्धि वेद गृहीतव्यं मुमुक्षुभिः ॥ ८४ ॥ अद्रोहस्त्वाप्यलोभश्च दमो भूतदया शमः ॥ ब्रह्मचर्यं त
पः सत्यमनुक्रोशः क्षमा धृतिः ॥ ८५ ॥ सनातनस्य धर्मस्य मूलमेतदिति ईरितम् ॥ तस्मात्सांप्रतं सदा मां ॥१०५॥

समिस्ते पापरमास्थिति ॥ ८६ ॥ अहिंसादिः परो धर्मः प्राचीनो नाधुना ततः ॥ असन्मतेत तस्त्वत्का
शीकृष्णा ह्यमाचरे ॥ ८७ ॥ कृष्णं तत उवाच ॥ इत्याश्रुत्य हरेर्वाक्यं कीचको तीव्रविस्मितः ॥ सर्वज्ञं तं प्र
भुं मेने त्वद्विनाः सन्निजं मतम् ॥ ८८ ॥ मकारैर्यजनं देव्याः अप्रमाणं तदास्तु ॥ प्रतिपादयितुं नैव शश
शाकपुरतो हरेः ॥ ८९ ॥ निर्मानो निर्मदो भूत्वा नीत्वा ऽधर्मतोऽभ्रशाम् ॥ किंचित्स्वमानरक्षार्थं तं प्र
णम्या ऽब्रवीद्वचः ॥ ९० ॥ नारायणमुने मत्सत्त्वपायत्योऽच्यते वचः ॥ ज्ञातरानीयमकृपान्दृशायिष्येपु
राणान् ॥ ९१ ॥ किंचित्कार्यं सांप्रतं मे भवतीतिव्रजाम्यहम् ॥ इत्युक्त्वा स ययौ शीघ्रं सहत्रिष्यां दि
भिस्ततः ॥ ९२ ॥ प्रावृत्तवासमासावकृत्यानंनीतं स वेपथुः ॥ सो ऽगात्फेहं यथा सर्पो वैनतेयसुखच्युतः
॥ ९३ ॥ गते ऽथ तस्मिन्भगवान्साध्वितैः सहतत्क्षणम् ॥ मञ्जीत तशगेवितते तत्र सर्गां घनुत्तये ॥ ९४
॥ पुनः सर्वान्समभ्येत्य प्रभुः प्राह निजाश्रितान् ॥ देव्याः पूजा मयापानैव भक्ता वादे न खंडिता ॥ ९५ ॥ किं त्व
धर्मो हि तत्र स्यो मया सम्यक् प्रदितः ॥ नैवान्यजाततः कार्या देव्या धर्मावनस्थितेः ॥ ९६ ॥ सभार्यां
विदुषो विप्रान्सदा कौशितिरेज्ञयन् ॥ धर्मस्यैवाश्रवनं च क्रियमाणस्य दुर्जनैः ॥ ९७ ॥ प्रमाणं वाकौ
प्रवक्ष्ये शाक्तमार्गस्थितं महत् ॥ मकारपंचकात्थं स पापमेव मनीनशत् ॥ ९८ ॥ गंधपुष्पधृतक्षीरे

स॰ जी॰ द्वि॰ दैवं पाः सम्यक् पूजनम् ॥ ततश्चिन्तयमाथवर्चक्कैः स्थापयामास सप्रभुः ॥ ९९ ॥ एवं स द्धर्म्ममर्यादां तस्य अ॰ ४७ ॥
॥ १०६ ॥ पश्यतो हरेः ॥ मोक्षदे का दशीत त्र स्य पद्युतन्नृमिपः ॥ १०० ॥ कारयामास तस्यांच कृष्णार्चनमहोत्सव
म् ॥ ग्रामांतरेभ्यो भ्याजग्मुर्जना स्तत्र सहस्रशः ॥ १०१ ॥ दर्शावलाभ गतानक्ताः स्वपुरागमनायतम् ॥ प्रा
र्थयन्तु सस्त्र्यं तेविष्णुगुप्ता दयो पुरुः ॥ १०२ ॥ तेष्व्य प्रसन्नोनगवांस्तदैव सहतैस्ततः ॥ निर्ययौ तत्पु
रंगंतु मारुह्योन्नविनद्रथम् ॥ १०३ ॥ जयतल्यपुरस्थ्यमक्कवृंदसनिवर्त्तनोखुगतन्हृती ग्मूर्वारैः ॥ पथिचिना
वसपेषु भक्तिमांसानिवसन्नर्विगलत्गुरुं तदायत ॥ १०४ ॥ इति श्री म र्ग गीतो वनेनारायणचरित्रे ध
र्मज्ञानो द्वितीयप्रकरणे जयतल्य पुरेस्तु उशास्क्रमतस्वेंद्रसमर्हिंसाधर्मस्थापनवादिपराजयनिरूपणनाना
मा सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ कल्याणवाच ॥ प्रस्तुराप्तुस्तमायातं ज्ञात्वा पौरजनान् नृप ॥ गीतैर्वादित्रघोषै
श्च नादयंतो दिशो दश ॥ १ ॥ अश्ववारैः परिवृत्तं चे च कुत्तकरेरथ ॥ आपातं तं हरिं दृष्ट्वा दृष्टाः धावन्त्स ह
स्रशः ॥ २ ॥ ततस्तं प्राणवदिति प्रणेमुर्दंडवज्जनाः ॥ आनंदाश्रूणि मुंचंतो हृष्टा पुलकितस्तनवः ॥ ३ ॥ भग
वानपितान्भक्तान्मानयित्वायथोचितम् ॥ तैः स्तूयमानसत्कीर्तिः पुरमभ्याययौ ततः ॥ ४ ॥ सद्वर्ज्जोना
र्थजनता संमर्दैः सान्महानिति ॥ पुरादहिर्वेदाधस्तान्सः स्वावासमकारयत् ॥ ५ ॥ ततो मुनीमार्षदांस्त्वना ॥ १०६ ॥

नादेशागतान्जनान् ॥ पोषितस्त्रयथा पोषं भगवान्समवासयत् ॥ ६ ॥ निजानंदयन्भक्तानुधर्ममार्गे प्र
वर्त्तयन् ॥ उवासतत्रसहरिः पुष्टतुस्तं चते जनाः ॥ ७ ॥ केसरागुरुकस्तूरिमिश्रैः कुंकुमचंदनैः ॥ स्रग्
भिभिः पुष्पहारैश्चमहास्त्रैश्चविभूषणैः ॥ ८ ॥ उपहारानवकृविधान्विदधुः पुरवासिनः ॥ चक्रुर्नीराजनं
भक्त्या कुर्वंती गुणकीर्त्तनम् ॥ ९ ॥ आतिथ्यं समुनेस्तस्य चक्रुः पौरा यथोचितम् ॥ पुमांसस्त्रस्त्रियोप्य
न्या परिचर्याम कुर्वत ॥ १० ॥ पौराणिको मयाराममोगोविदस्त्र कुबेरजित् ॥ निर्भयो भ्रातृरामस्त्रहरिकृ
ष्णादयो द्विजाः ॥ ११ ॥ रघुनाथदासयुग्मं विष्णुगुप्तस्त्र राजजित् ॥ प्रयागसप्रमुखाविप्राः पर्यचरेश्च त
म् ॥ १२ ॥ अवजाज्ञाकरादत्ताशिवाद्यापोषितस्तथा ॥ पस्विर्पारतास्यासन्दृढभक्तप्रभ्यादरात् ॥ १३ ॥ अ
प्यत्राग तैर्विप्रै विदृद्भिः सहस्रशः ॥ भगवान्कारयामास विष्णुयागमहोत्सवम् ॥ १४ ॥ कुंडं च मंडपं
विप्रास्तत्र कृत्वा यथाविधि ॥ दशांशहोमं कृत्वा च चक्रुः पूर्णाहुतिं ततः ॥ १५ ॥ महद्भिरैवसंभारैर्यज्ञस्यास
सीत्तस्तमः ॥ पत्रतृप्यैः स्तुराः सर्वेस्तुतुषुः पापसाक्षिभिः ॥ १६ ॥ प्रस्तुराजसमितैनैर्भोज्यैर्दक्षिणाभिः स्त्रवा
उवाः ॥ यत्र संतुतुषुः सर्वे येचान्ये त्वार्थिनोऽपिते ॥ १७ ॥ पक्कान्नानांनद्ठुकानां सिनानो घनसर्पिषा ॥ बभू
तु राश्यो यत्र गंदशैलनि भान् नृप ॥ १८ ॥ दीपतां दीयतामेत भुज्यतां भुज्यतामिति ॥ आसीत्तुमुलो घो

स.जी.द्वि यो विप्राणां यत्र सर्वतः ॥१९॥ तेभ्यश्च दक्षिणाः प्रादाद्धिरण्मयीस्तु विशेषतः ॥ पात्रापात्रविचारज्ञो भग- अ०४८॥
॥१०७॥ वान्सपयोचितम् ॥२०॥ कन्यादानान्यनेकानि कारयामास च प्रभुः ॥ तथा द्विजकुमाराणां मौञ्जीबं-
धान्यथाविधि ॥२१॥ एकेभ्यः पापभीरुभ्यो दुर्बलेभ्यश्च भूरिशः ॥ धनं संदापयामास हरिरेभ्यश्च
सर्ववित् ॥२२॥ याचकेभ्योऽत्युत्तंकारान्स्वर्णशृंखलकादिकम् ॥ ददौ च सहस्राश्रीनीवस्त्राणि विवि-
धानि च ॥२३॥ भूमिदानं च गोदानमश्वदानं तथैव च ॥ महादानानि सर्वाणि कारयामास सोऽच्युतः
॥२४॥ यथा यज्ञो महानासीद्धर्मावर्माहरेस्तथा ॥ न भूमौ भूपतेः कोऽपि हरपतेश्च यतेरपि वा ॥२५॥ संव-
त्सरे विक्रमाख्ये वर्त्तमाने महामखम् ॥ एतं समापयत्पौष्यां तु विविस्थापयन्नृपान् ॥२६॥ अत्रैव
साक्षाद्भगवत्समीक्ष्यं गुरुः ज्ञानानंदमुनिर्महाऽपत् ॥ संस्थापयामास निजांतिके तं श्रीसहरिश्च
क्षितिपस्वनक्रमम् ॥२६॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे दभोवती-
पुरे विष्णुयागमहोत्सवनिरूपणनामाऽष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ सुव्रत उवाच ॥ एवं महाविष्णु-
मखं समाप्य सतोषयित्वाऽखिलभूसुरांश्च ॥ महासभायां हरिरुच्चपीठमध्यारुरोहाखिलैः परिपूज्यमा-
नः ॥१॥ मर्यादयातत्र च संनिविष्टाभक्ता नरोत्तमाः पुरुषाश्च योषाः ॥ विलोकयांचक्रुरमृतमिश्रया ॥१०७॥

नानानेत्रपद्मिस्यमसौजगाद ॥२॥ श्रीनारायणमुनिरुवाच ॥ भक्ताः शृणुत कस्यापि प्रश्नं यं यदि किं-
चन ॥ न वेत्त हिंसमामस्तु कश्चिन्न परिपृच्छतु ॥३॥ सुव्रत उवाच ॥ नमस्कृत्याथ तं भक्तास्सभायां तत्र
संस्थितः ॥ सूरः पप्रच्छ नृपतिर्नागरैककपुराधिपः ॥४॥ सूरसिंह उवाच ॥ श्रोतुमिच्छामि भगवन्नि-
ह्यामुत्र करवावहम् ॥ राज्ञः किं सर्वकृत्येषु श्रेष्ठं तत्कर्तुमर्हसि ॥५॥ सुव्रत उवाच ॥ इति तेन स संपृ-
ष्टो निजभक्तेन भूमिप ॥ ब्रह्मण्यदेवो भगवान्जगादानंदयन्सदः ॥६॥ श्रीनारायणमुनिरुवाच ॥
यथापृच्छमिमां तद्वो यं प्रश्नं त्व धर्मगाद ॥ भारते दानधर्मेषु श्रुत्वा राज्ञः शिबेः कथाम् ॥७॥ तमुवा-
च महातेजाय ऋषीनुनेदनः ॥ भीष्मो धर्मभृतां श्रेष्ठस्तत्तदहं कथयामि ते ॥८॥ सूर उवाच ॥ एतद्-
राज्ञः कृत्यतमं भिष्मि कृष्णभारत ॥ ब्राह्मणानामनुष्ठानमेसंतं तत्कर्तव्यमितीरितः ॥९॥ कर्त्तव्यं पार्थि-
वेनेह तद्विद्धि भरतर्षभ ॥ श्रोत्रियान्ब्राह्मणान्वृद्धान्नित्यमेवाभिपूजयेत् ॥१०॥ पौरान्जानपदांश्चा-
पि ब्राह्मणांस्तु बहुश्रुतान् ॥ सांत्वेन भोगदानेन नमस्कारैस्तथार्चयेत् ॥११॥ एतत्कृत्यतमं राज्ञो नि-
त्यमेवोपलक्षयेत् ॥ यथात्मानं यथा पुत्रांस्तथैतान्प्रतिपालयेत् ॥१२॥ ये चाप्येषां पूज्यतमास्तान्द्र-
ढं प्रतिपूजयेत् ॥ तेषु शांतेषु तद्राष्ट्रं सर्वमेव विराजते ॥१३॥ ते पूज्यास्ते नमस्कार्या मान्यास्ते पितरो य-

या ॥ नैवेद्ययात्रालोकानां भूतानामिव वासवे ॥ २४ ॥ अदैवं दैवतं कुर्युर्दैवतं चाप्यदैवतं चाप्यदैवत 
मू ॥ यमिच्छेयुः स राजा स्याद्यो नेष्टः स पराभवेत् ॥ २५ ॥ परीवादं स्वयं कुर्युर्ब्राह्मणानामचेतसः ॥
सत्यं ब्रवीमि ते राजन्नुचिनष्टे पुनर्संशयः ॥ २६ ॥ ब्राह्मणा ये ब्रवंतं संति पुरुषाः सम्प्रवर्द्धिते ॥ ब्राह्मणैर्यः
पराकृष्टः पराभूयात्स क्षणादिह सः ॥ २७ ॥ परिवादो द्विजातीनां नश्रोतव्यः कथंचन ॥ आसीनाधो
मुखस्तूष्णीं समुत्थाय प्रव्रजेच्च वा ॥ २८ ॥ न स जातो जनिष्यन्वा पृथिव्यामिह कश्चन ॥ यो ब्राह्मणविरो
धेन सुखं जीवितुमुत्सहेत ॥ १९ ॥ एते भोगैरलंकारैरन्यैश्च वकिभिक्षुकैः ॥ सदा पूजानमस्कारै
रस्याश्चपितृवन्नृपैः ॥ २० ॥ ब्राह्मणजातिसंपन्नं धर्मज्ञं संशितव्रतम् ॥ वासयेत् गृहे राजन्नतः
स्मात्परमस्ति वै ॥ २१ ॥ ब्राह्मणेभ्यो हविर्दत्तं प्रतिगृह्णंति देवताः ॥ पितरः सर्वभूतानां नैतेभ्यो
विद्यते परम् ॥ २२ ॥ आदित्यश्चंद्रमा वायुरापो भूरंबरं दिशः ॥ सर्वे ब्राह्मणमाविश्य सदान्नमुपभुं
जते ॥ २३ ॥ न तस्याश्नंति पितरो यस्य विप्रा न भुंजते ॥ देवाश्चाप्यस्य नाश्नंति पापस्य ब्राह्मणद्विषः ॥ २४
॥ ब्राह्मणे तु तुष्टे प्रीयंते पितरः सदा ॥ तथैव देवता राजन्नात्र कार्या विचारणा ॥ २५ ॥ ये ब्राह्मण
मुखात्तस्मात्तं प्रतिगृह्णंति वै वचः ॥ भूमिपाल महात्मानस्तेन यांति पराभवम् ॥ २६ ॥ क्षत्रियाणां प्रत 

पतां तेजसा च बलेन च ॥ ब्राह्मणो ह्येव शाम्यंति तेजांसि च बलानि च ॥ २७ ॥ जन्मनैव महाभागो ब्राह्म
णो नाम जायते ॥ नमस्यः सर्वभूतानामतिथिः प्रसृताग्रभुक् ॥ २८ ॥ ब्राह्मणानां परिभवात्क्रूराः
सलिलराशयः ॥ ब्राह्मणानां प्रसादाच्च देवाः स्वर्गनिवासिनः ॥ २९ ॥ न ब्राह्मणविरोधेन शक्या शा
स्तुं वसुंधरा ॥ ब्राह्मणा हि महात्मानो देवानामपि देवताः ॥ ३० ॥ तान्पूजयस्व सततं दानेन परिचर्यया
॥ यदीच्छसि महीं भोक्तुमिमां सागरमेखलाम् ॥ ३१ ॥ श्रीनारायणमुनिरुवाच ॥ इत्थं भीष्मो धर्मरा
जं गदितो नृप कर्म तु विप्रसन्मानमेवाह स च राजा तथाऽकरोत् ॥ ३२ ॥ श्रीकृष्णो द्वारकायां च विभी
चशारदं नृगम् ॥ अशिक्षयत प्रजाः सूरतद्वचांस्य विमन्युलु ॥ ३३ ॥ श्रीकृष्ण उवाच ॥ कृष्णपरिजनं प्रा
ह भगवान्देवकीसुतः ॥ ब्रह्मण्यदेवो धर्मात्मा राजन्यानन्वशिक्षयन् ॥ ३४ ॥ दुर्जरं बत ब्रह्मस्वं भुक्त
मग्नेर्मनागपि ॥ तेजीयसोऽपि किमुत राज्ञामीश्वरमानिनाम् ॥ ३५ ॥ नाहं हलाहलं मन्ये विषयस्य
प्रतिक्रिया ॥ ब्रह्मस्वं हि विषं प्रोक्तं नास्य प्रतिविधिर्भुवि ॥ ३६ ॥ हिनस्ति विषमत्तारं वह्निरद्भिः प्रशा
म्यति ॥ कुलं समूलं दहति ब्रह्मस्वारणिपावकः ॥ ३७ ॥ ब्रह्मस्वं दुरनुज्ञातं भुक्तं हंति त्रिपूरुषम् ॥ प्रसह्य
तु बलाद्भुक्तं दश पूर्वान्दशापरान् ॥ ३८ ॥ राजानो राजलक्ष्म्याऽधा नात्मपातं विचक्षते ॥ निरयं येऽगनि

॥ स.जी.प्र.४ ॥ मन्यंते ब्रह्मस्वं साधु वाजिरम् ॥ ३९ ॥ गृहीत्वा ति याचतः पांसून् कंदतामश्रुबिंदवः ॥ विप्राणां रुदतां तेषां ॥ अ०४९ ॥
॥ १०७ ॥ वदान्यानां कुटुंबिनाम् ॥ ४० ॥ राजानो राजकुल्याश्च यावतोऽब्दान्निरंकुशाः ॥ कुंभीपाकेषु पच्यंते ब्र
ह्मदायापहारिणः ॥ ४१ ॥ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेच्च यः ॥ षष्टिवर्षसहस्राणि विष्टायां जायते कृ
मिः ॥ ४२ ॥ न मे ब्रह्मधनं भूयाद्यद्गृध्वाऽल्पायुषो नराः ॥ पराजिताश्च्युता राज्याद्भवेत्तु द्वेजिनोऽहयः ॥ ४३
॥ विप्रकृतागसमपि नैव द्रुह्यत मामकाः ॥ घ्नंतं बहु शपंतं वा नमस्कुरुत नित्यशः ॥ ४४ ॥ यथाऽहं प्रणमे
विप्राननुकालं समाहितः ॥ तथा नमत यूयं च योऽन्यथा मे स दंडभाक् ॥ ४५ ॥ ब्राह्मणार्थो ह्यपहृतो ह
र्तारं पातयत्यधः ॥ अजानंतमपि ह्येनं नृगं ब्राह्मणगौरिव ॥ १ ॥ श्रीनारायणमुनिरुवाच ॥ एवं कृष्णेन
नृपते शिक्षिता द्वारिकौकसः ॥ तस्याज्ञायामवर्तंत ततः प्रापुः सुखं महत् ॥ ४६ ॥ अतस्त्वया नृपैश्चान्यैः
क्षत्रियैश्च मदाश्रितैः ॥ जनैश्च ब्राह्मणा मान्याः पूजनीया विशेषतः ॥ ४७ ॥ दुर्वेदा वा सुवेदा वा प्राकृताः सं
स्कृतास्तथा ॥ ब्राह्मणा नावमंतव्या भस्मच्छन्ना इवाग्नयः ॥ ४८ ॥ यथा श्मशाने दीप्तौजाः पावको नैव दुष्य
ति ॥ एवं विद्वानविद्वान् ब्राह्मणो दैवतं महत् ॥ ४९ ॥ मधुराज्यसितोपेतैर्भक्ष्यैर्भोज्यैश्च तर्पितैः ॥ तोषिता
यदक्षिणाभिर्ब्राह्मणा भगवत्प्रियाः ॥ ५० ॥ तुष्टेषु ब्राह्मणेष्वेवं संतुष्टः कमलापतिः ॥ भवतीति मया प्रो ॥ १०७ ॥

क्तं कर्तव्यं श्रेय इच्छता ॥ ५१ ॥ सुव्रत उवाच ॥ इति श्रुत्वा भगवतो धर्मसूनुः स भूपतिः ॥ भक्ताश्चान्येऽपि
तं नत्वा तस्याज्ञां शिरसादधुः ॥ ५२ ॥ एवमानंदयन्भक्तान्स्वैरं भगवान्स तु ॥ उवास नृपतेर्मासं गो
त्रैर्बहुधार्चितः ॥ ५३ ॥ तत्र देशांतरायातान्भक्तांस्तत्प्रार्थयन्प्रभुः ॥ स्वस्वग्रामागमायाथ तत्पैस
दृशश्चापि तान् ॥ ५४ ॥ स्थापयित्वा मध्यानेकग्रामस्थितान्स्वसमाश्रितान् सह मुनिगणैर्दर्भावसा हरि
र्नृपतिर्ययौ ॥ स्वमनुव्रजतो दूरं भक्तान्निवार्य पुरीं कृष्णोऽनयन सजितानापाहैणां च रोत्तरसंज्ञकम् ॥
५५ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे द्वारावतीपुरे महाराजस्य तमहीसु
रे ब्राह्मणमाहात्म्यनिरूपणनामैकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ सुव्रत उवाच ॥ तत्र भक्ताः प्रतिग्रा
मं तस्याऽऽसंश्च नराधिपः ॥ सर्वांस्तान्सुखयामास तत्तद्ग्राममततः स च ॥ १ ॥ ततो महीं समुत्तीर्य दे
शे काकमनामनि ॥ भक्तग्रामेषु निवसन्भृगुक्षेत्रमवाप सः ॥ २ ॥ एकं द्वे वा दिने स्वामी दिनान्येवापि कु
त्रचित् ॥ पक्षार्धपक्षमेकं वा मासं वसन्कुत्र विचचार सः ॥ ३ ॥ तत्र तत्र वसन्ग्रामे सद्धर्मं समतिष्ठिपत् ॥ सच्छास्त्रा
नुसृतैर्वाक्यैरुच्चैर्व्याख्यानचतद्विभुः ॥ ४ ॥ कुत्रचित्तु महारुद्रं विष्णुयागं क्वचिन्नृप ॥ पुरश्चर्यां च गायत्र्याः श्री
सूक्तस्य च कुत्रचित् ॥ ५ ॥ विष्णुनामसहस्रस्य श्रीनारायणवर्मणः ॥ क्वचिच्च हरिगीताया पुरश्चर्याम

कारयत् ॥ ६ ॥ वेदपारायणं क्वापि कुत्रचिच्छतरुद्रियम् ॥ श्रीमद्भागवतस्यापि पुरश्चर्यामचीकरत्
प ॥ ७ ॥ दशमस्कंधमात्रस्य पुरश्चर्यां च कुत्रचित् ॥ सवाम्कदेवमाहात्म्यस्यापि क्वाप्यत्यकारयत् ॥ ८ ॥ धर्मप्र
वृत्त्यैव विचरन्धरायामुत्तीर्य रेवां तपतीप्रतीरे ॥ उपागमत्सूरपुरं स राजन्स्वभक्तसंप्रार्थित आत्मतंत्रः
॥ ९ ॥ आयांतमाश्रुत्य हरिं तदैव प्रसुप्रपुर्भक्तजनाः सहर्षम् ॥ वादित्रगीतध्वनिनादिनानायानैर्विचि
त्रैः सह दर्शनीयैः ॥ १० ॥ आरोप्य राज्यो नृपतेरमात्यौ श्रीनाममं पीतुसमाकृयेन ॥ विचित्रवादैः सह
राजकीयैरभ्यापयौ सत्कृतदन्नकार्यः ॥ ११ ॥ अन्येपि ते शास्त्रविशेहिजेशः अभ्याययू राजसमाश्रया
श्च ॥ पुरे प्रकंगगतमेवतं तेरदृष्ट्वा प्रणेमुः सहसैव सर्वे ॥ १२ ॥ तानानयित्वाथ यथोचितं स्वात्र हयाधि
रूढः सह तैः पुरं तत ॥ सप्राविशत् नृपतिवर्त्तु पौरैर्नरैः सचितं परिवंद्यमानः ॥ १३ ॥ विशालजायांबाटि
कायां सौधे महति शोभने ॥ भक्तास्तं वासयामासुर्यथार्हं तस्य चानुगान् ॥ १४ ॥ सातिथ्यं विदधुस्तस्य
सर्वे तेश्याररेरणेन ॥ एवाराममुख्यानिष्यश्च कुत्तसेवनं मुदा ॥ १५ ॥ भाजचंद्रो गिरिधरो गोविंदोपाद
वस्तथा ॥ भिक्षाहारि मौक्तिकश्च लक्ष्मीचंद्रो नरोत्तमः ॥ १६ ॥ भगवत्समुख्यास्याभेविशास्तन्येव नेरताः
॥ आसन्सफलयंतः स्वं मानुषं जन्म भूपते ॥ १७ ॥ महालक्ष्मीस्वजीवंतीजादुर्दै भादयश्चतम् ॥ नार्यः ॥ ११० ॥

पर्यचरन्प्रीत्या भक्तिमत्यः पतिव्रताः ॥ १८ ॥ हेमैर्दिव्यभूषणैर्वस्त्रैर्विविधैश्छत्रचामरैः ॥ गंधमाल्या
दिभिर्भक्ताश्चक्रुस्ते पूजनं हरेः ॥ १९ ॥ भक्ष्यैर्भोज्यैश्च पक्वान्नैर्विविधैर्व्यंजनैस्तथा ॥ हरिं सपरिवारं
तेतर्पयामासुरादरात् ॥ २० ॥ द्वितीयेऽल्पक्षयाख्यां तृतीयायां हरिस्ततः ॥ अकारयत्परशुरामस
मर्चनमहोत्सवम् ॥ २१ ॥ तत्र सप्तदशसनाख्या गवैः स्थापितो नृपः ॥ सन्माने नातिमहता मुनिभिः
सहितं हरिम् ॥ २२ ॥ त्रेम्पपित्वाथ हत्नानि दुर्गमानीय चात्मनः ॥ चकार महतीं पूजां तत्वासोधनादि
भिः ॥ २३ ॥ भक्ता भगवतीः मासाराज्ञे आदी श्रूरादयः ॥ अपि पृथक्पृथक्स्वं स्वं गृहं निसुस्तमादरात्
॥ २४ ॥ प्रीत्या तेपि महापूजां च कुस्तस्य सबांधवाः ॥ अनर्घ्यवासोलंकारनानाह्वार्पणादिभिः ॥ २५
॥ नारायणद्वेषिणो येतत्र सौवंध्मवादयः ॥ तेतु तस्य प्रतापेन किंचित्कर्तुं न शेकिरे ॥ २६ ॥ भगवां
स्तत्र सद्धर्मस्थापयन्तुरवासिनाम् ॥ जहारात्मान तिमिरं वचोभिर्धर्मसंश्रयैः ॥ २७ ॥ असूत्वान्यपि
वासांसि भूषणानि च सर्वशः ॥ ब्राह्मणेभ्यो ददौ प्रीत्या धनं च विपुलं प्रभुः ॥ २८ ॥ यत्र यत्र च हरेर्नरा
कृति ब्राह्मणोऽर्चनमत्र कुरातत्वे ॥ तत्र तत्र सकलाग्रजन्मनां दुर्विधत्वमगमद्द्विजीनताम् ॥ २९ ॥ इ
ति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे सुर्यपुरगमननिरूपणनामपंचात्रा

॥स॰जी॰छि॰ मुक्तीः॥१९॥कृचनयदपिनास्तिभोगलक्ष्मानिजचरणौ करतमस्य नस्य चित्ते॥तदपिच वितरत्यसौ महां अ०५१॥
॥२२१॥ तं विनवममर्त्यसुदुर्जनं स्वधाम्नि॥१९॥प्रियसुतमुत हृदिस्थदैवमात्मासकलमपीहहरिहिं यस्य पुंसः
॥क्वचिदपिनहितस्य कालमायाभयमनवाय पतो नृणां वपुल्लत्॥२०॥स्वतनयधनधामजो कृष्णा
ज्ञाः सुखवरधाम गर्भैर्यणांच हित्वा॥भगवति हरिदानुरागमातो निज हृदि [illegible] स्तमसौ स्मरसखेरम्॥
२१॥तपति दहति वाति भास्करोऽग्निर्मरुदिव वर्षति वासवश्च मृत्युः॥चरति जगति यद्भयात्स विष्णुर्वि
पदरमं परितश्च पातिनित्यम्॥२२॥हृदि विधृततदीयपादपद्मागनखविधुमैरजकांतिविर्ज्यो सभाजि॥तादि
तरसुखगर्ईनोत्थतापो नभवति तस्य यथाग्निमौ बुधूरे॥२३॥विधिमुखमनुरचिंतनीयपादः स्थिरचरदे
हिनियामकोपिकृष्णः हृदरतिरज्ञानानि ब्रह्मपादो रूदयमहीनविहीनतुमस्मज्ञानकः॥२४॥प्रियतमानरमान
च राधिकाप्रियतमो न विधिर्नच भोगिराट्॥भगवतो ननिजापितनुस्तथाभुविय पादद्वनभक्तिपरो नरः
२५॥सांख्येन योगेन मखैस्तपोभिः संन्यासवेदव्रतभूरिदानैः॥भीत्यै हरेः साध्वि हितैर्नमंते नभक्तिं तदीयां न
वधा प्रसिद्धाम्॥२६॥तस्मात्त्वपीदं परमं फलं यत्स्नेहो भवे भागवतेषु हि कृष्णे॥यावन्न सत्या न जनीच ता
वन्नभक्तिं धुर्यैरं कुरितेति बोध्यम्॥२७॥गाढस्नेहो यदास्याद्भगवति सुखदे भक्तिभाजां तदानीमस्मिंल्लो ॥२२१॥

केपरे वा मननिरुचिकरं तं विना स्यान्न किंचित्॥तत्क्लेवा चिंतनाद्यावपि रसिकतपाभूरि कान्तापपानं
तेषां स्याद्धक्षणांस्तद्विहितरहजचः कल्पनामेव यावत्॥२८॥जाते तद्विरहे विचित्तवदसौ भक्तस्तदा
कारकं विश्वं पश्यति भावतेच तरुणाल्लं भेनकुड्येन वा॥देहे क्वापि तदा हृतिदृशिरध्यस्तचेष्टितं च च
ते रोति क्वापि हसत्यथोन्मदरवान्नेदेन संनृत्यति॥२९॥हृदि तं लवजो क्वकाहिचित्प्रसरत्येव मनरा
सुरुद्ध कंठः॥अननुस्मृतदेहएव तस्मिन्सविजीनो बहिरेस्यवेलुयाः स्यात्॥३०॥नहि केवलमीहृशाः पु
मांसोनुविभक्ताः श्रुतचेदिनो भवेयुः॥अबला अपि चात्मधर्मसंस्था भगवत्स्नेहभरेण देववंद्याः॥
३१॥अविदः सुविदोपि विप्रराजो हृजश्रूद्रा अथनीचजातयोऽपि॥सकलाः कमजाधवस्य तुल्या रह
सप्रेमभजंति ये जनाः स्वम्॥३२॥अवगम्य तदीययारद्वात्वं सहसा वापि मनोः त्रयमस्मन् तक्मिन्॥रतिमा
यहर्दा सलुक्तजीवः पुरुषो वास्त्वबलाः स्तु वापि वंदः॥३३॥हरि संनिरतेन भक्तिदार्ढ्यं समतंतं सन्नरसं
गतो हि कार्यम्॥हरतीतरपादपादिरूपं ननु कृष्णात्स्वमनीयपार्षदं तम्॥३४॥भजनेनिरतोप्यपवृकृपो
गीत्युतितरपादपादिरूपं ननुकृष्णात्स्वमनीयपार्षदं तम्॥३४॥भजनेनिरतोपपक्वयोगीत्युतिमा

श्रीतिकुसंगतः कदाचित्॥ वितथानभवेद्धरेस्तु भक्तिपुनरेस्मजनुष्यः पीयमेनम्॥ ३५॥ अतएव
सदैवसावधानेन मनसोविष्णु मननंविहाय कुत्से॥ सुजनैः स्मरिपुंविहाय देहे हृदिविष्णुस्मविधीयतां
चभक्तिः॥ ३६॥ सततं वदेत्कलितनिर्जितं द्वियत्रीजगाली मोहाहंनात्तनृपुभवेस्त्वगामेहरिष्टान्॥ दीनेषुत
स्नुसकरं पितवद्ददेत्स्निग्धोभवेत्सरणासस्नुहरेस्तुभक्तः॥ ३७॥ तत्रैमपात्रगुरुसस्नुतदीयबु
द्धिर्विद्यार्थरूपकुलजन्ममदस्त्वनस्मात्॥ दांतेंद्रियोग्यमनिनिः स्मृहशांतकामः पद्रपस्सदात्युसद्धि
दंजगत्स्मभक्तः॥ ३८॥ तत्रकथितदेशासेवनरतस्तत्कर्मकृत्तत्परः संभूयस्वयमेववावितनुयात्त
त्स द्देयात्रीत्सवान्॥ पद्रपिघोमपपानिजात्मनिवहिश्वापावृत्तंतत्सोशवीनाधुनिकात्मनिष्ठगुणव
त्तभक्तरीतीः प्रयेत्॥ ३९॥ स्त्रीपुत्रेणजनेविधर्मिणिनरेपापेदिदंभीदुदेशाच्चोर्यातरदर्शनेनविदु
षित्रैशोद्यतेधर्मतः॥ विज्ञाकल्पितधर्मिणिप्रसनिनिकुदेवजुष्टेखलिकामार्त्तेपरधर्मगामिनिह
रिद्वेषेनसज्जेतसः॥ ४०॥ यादिरतिः सुरदानहरौभवेद्गुणगणोरपरैर्निभृतैस्तुकिम्॥ यदिचसाभवती
हृतदाःपरैरनुदितैरुदितैरपिकिंफलम्॥ ४१॥ यदपिकिंचनतत्प्रियकाम्यया व्रततपोनियमादिचरे
न्नरः॥ भवतितत्तदवत्सुभक्तिविवर्द्धनंकृतमथेतरथाल्पफलंभवेत्॥ ४२॥ बहुजनुर्भ्रमणोत्तरलंभितां ॥११२॥

नरतनुंसमवाप्यसुरेप्सितामू॥ मतिमतामिदमेवमतेः फलंविषयतोविरतिश्चहरौरतिः॥ ४३॥ इ
हसतुयदाभक्तोरक्तः शृणोतिगृणातिवामधुरचरितंविष्णोर्जिह्मोमुदापरयातदा॥ मनसिनि
भृतानंदस्मंदस्तदात्मकदुष्ट्रसतुजककुलकः स्मारंस्मारंभवतुदिताश्रुदृक्॥ ४४॥ रस्यंदिवमना
कलेर्नगवतःकृष्णस्यभक्तिंनरा येकुर्वंतिमनोरपान्सफलयसेषांहरिः प्रीतिःमान्॥ येतम्नृत्कु
तर्क्कितास्तदितरासक्ताश्चतेपुत्तुतेकामक्रोधरसादपीविदधतेशार्ङ्गजविक्रीदितम्॥ ४५॥ पीसैहरे
र्नसुरतामुनितान्नतावाविप्रत्वमात्मजननत्रपमिष्टकर्म॥ वृत्तंतपश्चनियमव्रतदानवृत्तंनिश्चयम
क्तिमपहायबकुश्रुतंच॥ ४६॥ अनुपतेभगवताःमजमक्त्यादत्तमंबुफलपुष्पदलादि॥ भूरिहेमनय
स्वाद्युविदोपान्नेपवदूपनिदशापिविनाताम्॥ ४७॥ अद्यवात्रातजनुर्भ्रमणांतेसफलितिर्नहिविनाहरि
भक्तिम्॥ रस्यमेवहरतिश्चपवान्बस्तीकरोतिभुविधन्यतरःस॥ ४८॥ योविदात्स्वजगारेरहंतांगोघो
रकोपमिनिज्ञागरितस्य॥ योनमोहहदपाशनिबद्धोभक्तिमान्प्रियतमःसहिविष्णोः॥ ४९॥ बाजे
योषितिदर्पणोनिजजनेरागेधनेमारकेनायंतेसुधियोपिविकलतराहोजादिनांकीड्स्ने॥ अपूर्व

पुनर्द्धिर्वित्तं न नरत्नं वित्तं न यशो सुरस्त्री भक्तिकरस्य स्मृतस्य पदयोः पांशुः सुरैरिष्यते ॥५०॥ एतादृशा
ये तु विसज्जनाः सुःश्रीहरिभक्ता निजधर्मनिष्ठाः ॥ मुमुक्षुभिस्ते गुरवो विधेयाः पूज्याश्च ते येषु सुरु
न्मतिश्च ॥५१॥ अन्यच्च ये हृत्स्वधियस्तु तेभ्यः सुहृद्द्विषो वा गुरुबुद्धयश्च ॥ तेषां पशूनां च यदंतरं तद्विपा
द्वतुष्पात्त्वमुदस्तमात्रम् ॥५२॥ सुव्रत उवाच ॥ इति तस्य गिरं सुधापमानां श्रुतिकं सेन निपीय वेश्य
वर्याः ॥ मुदिताः सद्धर्ममेव चास्मै सुदमायुः सकलास्तदीयभक्ताः ॥५३॥ हरिणं विष्णुहरिं चापि धर्मसू
नुं तमेव हि ॥ जानंतो जेमिरे तस्मिन्भक्तिदार्ढ्येन राधिप ॥५४॥ भगवद्भक्तमाहात्म्यं विदित्वा तत्त आदरात्
॥ मुनीस्तान्पूजयामासुर्भगवत्तमिवाखिलान् ॥५५॥ चंदनैरक्षतैः पौष्पैर्हारैर्वस्त्रैश्च भोजनैः ॥ संपू
ज्य तांस्ते विधिवद्ववंदुश्चरणं मस्तकैः ॥५६॥ भगवानपि भक्तानां तदादीनां पुरीकृताम् ॥ भक्तिं स्वस्मिंस्तथा
सत्सुस्थिरां दृष्ट्वा तुतोष ह ॥५७॥ आनंदयन्नुत्सकलजनं भक्तजनात्मपेस्यं प्रभो तरैः परमधर्ममयेर्मुनीशः
॥ तत्रावसत्सुपुरि सत्सदिनानि नित्यं पार्षदैर्मार्गममितो निखिलान् समुज्जम् ॥५८॥ इतिश्री सत्संगीजीव
नेनारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे सूर्यपुरे भगवद्भक्तिभक्तजनलक्षणनिरूपणनामैकपंचाशत्त मो॰ ॥११३॥

॥सुव्रत उवाच॥ एतस्मिन्नंतरे काचिद्दाती धर्मपुरेश्वरा ॥ श्रुत्वा सद्धर्मगुणांस्तस्य आसीत्भक्तिमति
स्थिराम् ॥१॥ भगवद्दर्शनोत्कंठा कुर्वती राज्यमप्यसौ ॥ आकृष्य सर्वतश्चित्तं तद्ध्याननिरताभवत् ॥२॥
कृशीकृततनुः कृच्छ्रैर्व्रतैर्भगवदाशये ॥ जितेंद्रियाकुशलाजा च सा ऽऽराधत मादरात् ॥३॥ सा मुकुंदः प्रैष
यद्दूतान्हरये बुद्धिमत्तरान् ॥ प्रतिजज्ञे स तेभ्यश्च तत्तु रागमनेन पा ॥४॥ तस्यै प्रसन्नो भगवान्सर्वे पांभा
चविच्चभुः ॥ स्वदर्शनं दातुमैच्छन्मुनिभिः सह सत्पतिः ॥५॥ अथ स्वैरन्वितो भक्तैः प्रापाद्धर्मपुरं हरिः ॥ यत्रा
स्ति कुशराजाख्या सा देवहूतिसमा गुणैः ॥६॥ आयांतमाश्रुत्य निजेशं देवं राज्ञी मुदा गमात्सजनैश्च पौरैः ॥ सा
कंतमभ्यागमदीक्षणोत्का गजं पुरस्कृत्य विभूषितांगम् ॥७॥ विचित्रवादित्रनिनादमुच्चैर्विधापयंती शि
बिकाधिरूढा ॥ पुरोपकंठे तमथा ऽऽप्य पादाब्जौ नतीर्यभक्त्या प्रणनाम रुष्टा ॥८॥ पौराः प्रणामं विदधुश्च त
स्मै सच्चापितां तांश्च यथार्हमीशः ॥ संमानयामास तया ऽर्थितो ऽथ पौच्च धारुरोह स्तमवारणं सः ॥९॥ जय
ध्वनिर्भूरितरस्तदा ऽऽसीत्सहस्रशो भक्तजनैरुदीर्णः ॥ समिश्रितो मंगलवाद्यघोषैरुत्कर्णयामास
ककुब्गजेशान् ॥१०॥ भक्तैश्च पौरैः परिवेष्टितोऽसौ ततः ॥ पुरं प्राविशदूर्जितश्रीः ॥ अलंकृतं तोरणपूर्ण
कुंभैः संमार्जितं चंदनवारिसिक्तम् ॥११॥ सत्काम्यकार्यैः पुरपोषितौघैः प्रेम्णोक्षमाणाः पथिपूण्यसं

स·नी·छि० स्थैः॥ कृतार्घ्यपन्त्स्वीयरत्नाजनौ धानु तुरेस रम्यं नृपसौधमाप ॥१२॥ अकारयत्तस्य सहानुगस्य राज्ञी अ०५२॥
॥११५॥ यथार्हं निजयेषु वासम्॥ चकार चातिथ्यमुदारचेता दासीवतं पर्यचरच्च भक्त्या ॥१३॥ महोपचारैर्विवि
धैरनर्घ्यैः पूजां ददतीयेऽह्नि पूर्णिमायाम्॥ तस्याः करोत्प्रीतिभरेण हृष्टा विस्मापयन्ती जनतां जनेशा ॥१४
॥ वस्त्रैर्नृपार्हैर्विविधैर्नवीनैर्विभूषणैर्हेममयैरनेकैः॥ सद्दलमुक्ताफलहारवर्यैर्गंधाक्षतैः स्तेन च पु
ष्पपुष्पैः॥१५॥ नस्त्रैश्च नोमैर्विविधैश्च लेह्यैः स्तंतर्पयित्वा समुनिव्रजं सा॥ राज्ञं च कोशं सगजाश्च धे
नुसर्वं स्वकीयं हरये त्यादिज्ञत॥१६॥ तथाऽतिभक्त्या सर्वस्वदीयमानमपि प्रभुः॥ नैवाऽग्रहीन्मुनिपति
स्तुष्टीभक्त्या तदीयया॥१७॥ ततः सा परयाभक्त्याऽध्यपुंभं हरेः पुरः॥ कृत्वा सर्वांस्तदनुगान्वस्त्रैर्द्रव्यैः पु
पूजच्च॥१८॥ भक्तिमेवंविधां तस्या दृष्ट्वाऽऽशुर्विस्मयं जनाः॥ भक्तप्रियश्च भगवान्स्य सन्तोनितराम भूत्
॥१९॥ आत्मनिष्ठोपदेशैस्तां बोधयित्वा महामतिम्॥ भक्त्या ददद्वै राज्यं राज्ञ्यै पुनरपृच्छत॥२०॥ ड
यं पुनर्न वस्त्राणि भूषणानि च सर्वशः॥ ददौ सन्नासुणादिभ्यः पूर्णकामो हरिस्तदा॥२१॥ सभायां तत्र भ
गवान्निषण्णो हैम आसने॥ मर्यादयोपविष्टान्स्तान्सर्वान्भक्तान वैक्षत॥२२॥ तूष्णीं तत्र निषण्णेषु भक्त
संघेषु संसदि॥ प्रणम्य राज्ञी साऽपृष्ठ स्तुवती प्रांजलीः प्रभुम्॥२३॥ राज्ञ्युवाच॥ नारायणाऽद्य भगवत्ता ॥११५॥

सफलीकृतो मे हृत्स्थाश्चिरंतनमनोरथपादपो वै॥ दानेन तुभ्यं भतरस्य कृदर्शनस्य नित्यं विशेषचि
मुखदैवत वांछितस्य ॥२४॥ यैरीक्षितं न स्फुरमानवमेगजांगं श्रीमद्वपुस्तवमनोहरमत्र नेत्रैः॥ ता
न्यत्प्लपत्र रुचिराण्यपि मानवानां मापूरवर्हगतचेरकतां भजंति॥२५॥ नाना विधाय निचय प्रश
मैकशीलां सद्भक्तिबोधनपटुं त्वदुदारकीर्तिम्॥२६॥ शृण्वंति ये रपि न शाष्कुलिका समानैः॥ क
र्णैस्त एव ननु नागबिलत्वभाजः॥२७॥ जिह्वाश्च या न तव गायति चारुगाथाः॥ संसारसागरसमु
त्तरणार्थनावः॥ सा ग्राम्यगीतनिपुणापि नमानवीसा भेकीमुधाऽनिशमसद्ववकारिणीहि॥२८
शुश्रूषणं भगवतस्तव यैः कृतं नो नोवासतामघहृत्पादरजोमात्रतोऽपि॥ तेभूषिता अपि महार्घ्य
विभूषणौर्हि तृणमात्रा शववनुमाररवगर्हणीयाः॥२९॥ त्वन्मंदिराणि च सतो निकृषा न यांति पादा
स्तु येन तु भूतामपि पद्मशोभाः॥ ते पैदकानन तरुत्वमिहैव यांति लक्ष्मीवनेऽत्र निरतामनुजास्तु ध
न्याः॥३०॥ सर्वत्र भगवन्स्वामिन्मयाद्युत वसेवनात्॥ प्राप्तं स्वजन्मसाफल्यं कृपयैव तव प्रभो॥३१॥ ध
र्मसंरक्षणार्थं त्वं स्वतंत्रः पुरुषोत्तमः॥ धत्सेनराकृतिं भूमावधर्मस्य च शांतये॥३२॥ कर्ता वक्ता च ध
र्मस्य त्वमेवाऽसि जगद्गुरो॥ त्वत्तः सनातनं धर्मं श्रोतुमिच्छाम्यहं ततः॥३३॥ धर्मसाधारणांनृणां विशेषं

स॰जी॰टि॰ चापि मे विभो वक्तुमर्हसि धर्मात्मन्धर्ममार्गप्रवर्त्तक ॥ ३३ ॥ रुद्र उवाच ॥ इति पृष्टः स भगवान्भ अ॰ ५२
॥ २२५ ॥ क्तिमत्या तया ऽऽदरात् ॥ प्रसुवाच प्रसन्नात्मा तोषयन्भक्तमंडलम् ॥ ३४ ॥ श्रीनारायणमुनिरुवाच ॥
साधु पृष्टं त्वया नृणां हितैषिण्या महामते ॥ तुभ्यं निष्ठुयभक्त्यै ना वाच्यं मम किंचन ॥ ३५ ॥ नृणां सना
तना धर्मा नारदेन पुरोदिताः ॥ धर्मराजाय तान्वच्मि श्रीमद्भागवतस्थितान् ॥ ३६ ॥ इत्युक्त्वा भगवां
स्तस्यै सप्तमस्कंधसंस्थितान् ॥ धर्मानुवाच सकलांस्तत्रत्यमुवाच ताम् ॥ ३७ ॥ इति ते कथिता धर्मा
मनुष्याणां सनातनाः ॥ निःश्रेयसप्रदा युक्ता ज्ञानवैराग्यभक्तिभिः ॥ ३८ ॥ एतदाचरयत्नेन सेवनीया मु
मुक्षुभिः ॥ अधिकारानुसारेण मनुजैर्मनुजाधिपे ॥ ३९ ॥ इत्युक्ता सा भगवता मुदिता नितरां नृप ॥
सिषिवे परया प्रीत्या तांस्तु धर्मस्यात्मेव हि ॥ ४० ॥ इत्थं प्रश्नोत्तरैः स्वामी प्रसन्नं धर्मसंश्रये ॥ आनंदयन्म
तोचार्यां स्तत्रोवास यथासुखम् ॥ ४१ ॥ उषित्वा वासरान्पंच ततो गंतुमनो ऽकरोत् ॥ तयान्वशं प्रार्थ्यमा
नो मासमेकमुवास सः ॥ ४२ ॥ सेमारेणातिमहता स्नानयात्रामहोत्सवम् ॥ कारयामास भगवानुज्जैस्थं
तत्र तयान्नृप ॥ ४३ ॥ एवं संतोषयित्वा तां भक्तवश्यो जगद्गुरुः ॥ स्मरन्नप्यपनूपाजवरं नियमत्ततः ॥
४४ ॥ अनुयांतितान्मुनेचासयौरांकुशाजो हरिः ॥ वल्गांतं संनिवर्त्यैव देवकीतीर्थमागमत् ॥ ४५ ॥ तत्र ॥ २२५ ॥

तीर्थविधिं कृत्वा थस्रजन्पूय श्रीमुनीन् ॥ आत्मानं वीक्ष्य पार्थ नानादेशान्महीजसः ॥ ४६ ॥ सहस्त्रेन स
मापातान् नानादेशजनानपि ॥ प्रेषयामास भगवान्स्वं स्वं देशं ततो ऽखिलान् ॥ ४७ ॥ आत्मसेवारतैर्नि
स्वर्णीभिः साधुपत्तिभिः ॥ सादिभिश्च समं प्रापाद मारूढो ऽर्कजानदीम् ॥ ४८ ॥ उत्तीर्य तां चरेवोच्चम
हीं साभ्रमतीं च सः ॥ मत्स्यदेशमतिक्रम्य दुर्गपत्तनमागमत् ॥ ४९ ॥ तत्र तत्रस्थ भक्तानां ग्रामेषु निवसन्
पथि ॥ तान्सर्वांस्तोषयित्वैव तत्रायातः स भूपते ॥ ५० ॥ आयांतं हरिमाश्रुत्य राजा पौरश्च सत्वरम् ॥ स्वका
न्कार्यां धावंतस्तं प्रत्युद्ययुरादरात् ॥ ५१ ॥ पुरीं पंककवलखाम्भुमायां तं वीक्ष्य ते मुदा ॥ प्रणेमुः साश्रुनय
नाश्चिरदर्शनविक्लवाः ॥ ५२ ॥ यथोचितं मानयित्वा तान् हरिः सहतैः पुरम् ॥ प्रविश्य तत्र स्वावासमे
त्यासनमुपाविशत् ॥ ५३ ॥ जयारमादयो योषा दृष्ट्वा तं हर्षविक्लवाः ॥ प्रणेमुः परया प्रीत्या गतं तद्विरहज्
ज्वराः ॥ ५४ ॥ आनंदं परमं प्रापज्ञानन्दयो ऽभयभूपतिः ॥ जानन्स प्रतितस्तं तं तत्रैवानिरतो ऽभवत् ॥ ५५ ॥ या
यास्त्वसेवा हरिणा विहिता यस्य यस्य च ॥ स स तां तां मुदा ऽकार्षीत्कृतार्थं स्वं विदंस्तया ॥ ५६ ॥ रथयात्रा
दिने तत्र हरिः संगवश्लोगतः ॥ मधाकेते नभूपेन महोत्सवमकारयत् ॥ ५७ ॥ सेवकैः सहितः सोऽथ
वसंस्तत्र हरिः स्वयम् ॥ सर्वत्रान्वेषयामास गुप्ताधर्मप्रवेशनम् ॥ ५८ ॥ अधर्मोत्थानमप्राणोद्य त्र यत्र स

ईश्वरः ॥ तत्र तत्र स्वयं गत्वा नाशयामास तं ततः ॥ ५९ ॥ क्वचित्क्वचिन्मुनींश्चापि प्रेषयित्वा तथाऽकरोत्
सर्वोपायैः सर्वकालं धर्ममेवाप्यपीपलत् ॥ ६० ॥ इत्थं धर्मधुरंधरः स भगवान्धर्मं प्रतिष्ठापयंस्तस्मि
न्दुर्गपुरे वसन्निजजनानानंदयामास च ॥ गत्वा ग्रामपुरांतराण्यपि ततः कृत्वोत्सवान्भूरिशस्तत्रागत्य
पुनः पुनः स भववत्सद्भक्तैककल्पद्रुमः ॥ ६१ ॥ इति ते कथितं सर्वं यत्पृष्टं भूपते त्वया ॥ नारायणस्य चरितं
कलिकल्मषनाशनम् ॥ ६२ ॥ नारायणस्य मुनिभिर्नृभिरिदं चरित्रं यः कीर्तयेच्च शृणुयादपि मानवोऽत्र
॥ तौ निश्चलं निजनरिपून्नृपते जयेत्तां वात्यांतरांश्च सकलं समीप्सितमाप्नुयात्ताम् ॥ ६३ ॥ इति श्रीसत्संगि
जीवने नारायणचरित्रे धर्मशास्त्रे द्वितीयप्रकरणे धर्मपुरस्थभक्तजनानंददुर्गपुरप्रागमननिरूप
णनामा द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥